DEVĪ-SŪKTA

(Reprinted from the Vedic Selections)

EDITED BY

KSHITISH CHANDRA CHATTERJI, M.A.

Lecturer in Comparative Philology, Calcutta University.

BCU
2641

CALCUTTA UNIVERSITY

1945

DEVĪ-SŪKTA

(Reprinted from the Vedic Selections)

EDITED BY

KSHITISH CHANDRA CHATTERJI, M.A.

Lecturer in Comparative Philology, Calcutta University.

CALCUTTA UNIVERSITY

1945

As. -/8/-

TBCU 2641

G1 2764

PRINTED IN INDIA

PRINTED AND PUBLISHED BY DINABANDHU GANGULEE, B.A.
SUPERINTENDENT, CALCUTTA UNIVERSITY PRESS,
48, HAZRA ROAD, BALLYGUNGE, CALCUTTA.

1481 B.T.—September, 1945.—c.

PREFACE

The Devī-sūkta is dear to the heart of every Hindu. The Bāṣkalamantropaniṣad is based on this splendid hymn and the Saptaśatī is regarded as an extensive commentary on this hymn. Reliable editions of the text and its commentaries are not easily available. No apology is, therefore, needed for publishing this portion of the Vedic Selections separately. Here the first commentary is from Sāyaṇa's Ṛgveda-Bhāṣya and the second from the Atharva-Veda-Bhāṣya attributed to the same scholar. In the Dīpikā, a modern commentary composed by the present Editor, an attempt has been made to unfold the peculiar beauty of each word and expression of this remarkable hymn.

The sūkta is attributed to Vāc, the daughter of Ambhṛṇa. The word अम्भृण occurs in RV. i. 133.5: पिशङ्गभृष्टिमम्भृणं पिशाचिमिन्द्र सं मृण। सर्वं रक्षो नि बर्हय ॥ where Sāyaṇa explains it thus: अम्भृणम् अतिभयङ्करं शब्दायमानम्। भृण शब्दे। यङ्लुगन्तात् पचाद्यचि छान्दसं सम्प्रसारणं भलोपश्च*। यद्वा महान्तम् अतिप्रवृद्धमित्यर्थः। अम्भृण इति महन्नाम, अम्भृणः साधिन: इति तत [*Nighaṇṭu* iii. 3] पाठात्। Veṅkaṭa-Mādhava regards it as the name of a demon. Geldner believes it to be etymologically connected with अम्भः† and अभ्र and translates with a query 'monstrous.' As Sāyaṇa points out, अम्भृण is read in the *Nighaṇṭu* in the list of words denoting 'great.'

---

* The printed edition reads छान्दसो भलोपश्च where the च shows that some word has been dropped.

† He compares TB. ii.3.8.3: तानि वा एतानि चत्वार्यम्भांसि—देवा मनुष्या: पितरोऽसुरा:।

The hymn of Aphrodite in the Hermetic books bears some striking points of resemblance to the Devī-sūkta. "As the producer of orderly harmonious motion, Venus may symbolize that Creative Word or sound which brought the Universe into being." The hymn is आध्यात्मिक at the beginning and प्रत्यक्षवत् at the end. A few stanzas are quoted below:

I am the Dawn, Daughter of Heaven and of the Deep: the sea-mist covers my beauty with a veil of tremulous light.

2. I am Aphrodite, the sister of Phoibos, opener of Heaven's gates, the beginning of Wisdom, the herald of the Perfect Day.

3. Long had darkness covered the deep: the Soul of all things slumbered: the valleys were filled with shadows: only the mountains and the stars held commune together.

4. There was no light on the ways of the earth: the rolling world moved outward on her axe: gloom and mystery shrouded the faces of the Gods.

5. Then from out the Deep I arose, dispeller of Night: the firmament of heaven kindled with joy beholding me.

10. Yea, I am before all things: Desire is born of me: I impel the springs of Life inward unto God: by me the earth and heavens are drawn together.

11. But I am hidden until the time of the Day's appearing: I lie beneath the waters of the sea, in the deeps of the Soul: the bird of night seeth me not, nor the herds in the valleys, nor the wild goat in the cleft of the hill.

17. I am the Crown of manifold births and deaths: I am the Interpreter of mysteries and the Enlightener of Souls.

23. O Love, thou art the latent heat of the earth; the strength of the wine; the joy of the orchard and the cornfield: thou art the Spirit of song and laughter and of the desire of Life!

24. By thee, O Goddess, pure-eyed and golden, the Sun and the Moon are revealed: Love is the Counsellor of Heaven.

25. Cloud and vapour melt before thee: thou unveilest to earth the Rulers of the immeasurable skies.

26. Thou makest all things luminous: thou discoverest all deeps.

27. From the womb of the sea to the heights of heaven; from the shadowy Abyss to the Throne of the Lord.

The following extract from the *Bṛhad-devatā* will be read with interest in connexion with the Devī-sūkta :—

घोषा गोधा विश्ववारा अपालोपनिषन्निषत् ।
ब्रह्मजाया जुहूर्नाम अगस्त्यस्य स्वसादितिः ॥
इन्द्राणी चेन्द्रमाता च सरमा रोमशोर्वशी ।
लोपामुद्रा च नद्यश्च यमी नारी च शाश्वती ॥
श्रीर्लाक्षा सार्परज्ञी वाक् श्रद्धा मेधा च दक्षिणा ।
रात्री सूर्या च सावित्री ब्रह्मवादिन्य ईरिताः ॥
नवर्चः प्रथमस्त्वासां वर्गस्तुष्टाव देवताः ।
ऋषिभिर्देवताभिश्च समृद्धे मध्यमो गणः ॥
आत्मनो भावदृष्टानि जगौ वर्गस्तथोत्तमः ।
उत्तमस्य तु वर्गस्य य ऋषिः सैव देवता ॥
आत्मानमभ्यधाद् वर्गस्तु देवतां यस्तथोत्तमः ।
तस्मादात्मसदेवेषु स्याद य ऋषिः सैव देवता ॥ ii. 82-87.

"Ghoṣā, Godhā, Viśvavārā, Apālā, Upaniṣad, Niṣad, Brahmajāyā (who is) named Juhū, the sister of Agastya, Aditi, and Indrāṇī, and the mother of Indra, Saramā, Romaśā, Urvaśī, and Lopāmudrā and the Rivers, (and) Yamī and the wife Śaśvatī, Śrī, Lākṣā, Sārparājñī, Vāc, Śraddhā, Medhā, Dakṣiṇā, Rātrī and Sūryā Sāvitrī, (all these) are pronounced to be female seers. The first group of these, consisting of nine, praised the deities ; the middle series conversed with seers and deities. So the last group sang of the evolutionary forms of

Self. Whoever is the seer (of a hymn by one) of the last group is also the deity. Now (each seer of) the last group thus praised herself as the deity: therefore whoever may be the seer in self-laudations is at the same time the deity." MACDONELL.

The following abbreviations have been used:

आप° ध° सू°—आपस्तम्बधर्मसूत्रम्। उ°—उणादिसूत्रम्। ऐ° ब्रा°—ऐतरेय-ब्राह्मणम्। का°—काशिका। कौ°—कौशिकसूत्रम्। छा°—छान्दोग्योपनिषत्। तै° आ°—तैत्तिरीयारण्यकम्। तै° ब्रा°—तैत्तिरीय-ब्राह्मणम्। तै° सं°—तैत्तिरीय-संहिता। धा°—पाणिनीय-धातुपाठः (माधवीय-धातुवृत्तिसम्मतः)। बृ° आ°—बृहदारण्यकोपनिषत्। ब्र° सू°—ब्रह्मसूत्रम्। श° ब्रा°—शतपथब्राह्मणम्। श्वेताश्व°—श्वेताश्वतरोपनिषत्।

AB.—Aitareya-Brāhmaṇa. Acc.—Accusative. Av.—Avesta. AV.—Atharva-Veda. AVS.—Sāyaṇa on the Atharva-Veda. B.—Brāhmaṇa. BU.—Bṛhadāraṇyaka-Upaniṣad. CU.—Chāndogya-Upaniṣad. Dat.—Dative. GB.—Gopatha-Brāhmaṇa. Gen.—Genitive. Gk.—Greek. M.—Max Müller's Ṛgveda (2nd edition). M. (p. 31)—Macdonell. MS.—Maitrāyaṇī Saṁhitā. Nir.—Nirukta. O P.—Old Persian. Rām.—Rāmāyaṇa. S.—Sāyaṇa. SBE.—Sacred Books of the East Series. ŚB.—Śatapatha-Brāhmaṇa. Śiś.—Śiśupālavadha. TS.—Taittirīya-Saṁhitā. V.G.S.—Macdonell's Vedic Grammar for Students.

On p. 21, l. 1 read "from the I. E. stem **svai* (Skt. स्वे) with the nominative singular ending अम् found in अहम् or from स्व after the analogy" etc.

KSHITISH CHANDRA CHATTERJI.

॥ श्रीः ॥

देवीसूक्तम्

Introductory Note

The goddess Vāk (Speech) is represented as praising herself in this hymn which became one of the most famous hymns in later times. The other hymn addressed to Speech is x. 71 some of the stanzas of which have become almost proverbial. It is probably this hymn that gave rise to the idea of *Sabda-brahman*.

"From the conception of the power of prayer and spells in the Veda it is clear how Speech could be looked upon as accompanying and supporting all the gods, and reaching wherever the magic power of the *brahma* extended. The idea bears a resemblance to the Word of God as personified in the *Wisdom of Solomon*, xviii. 15 ff., and to the Logos of Philo, but it did not lead to the same development in cosmogonic doctrine*."

In the *Sarvānukramaṇī* Vāk is said to be the daughter of the great sage *Ambhṛṇa* of whom hardly anything is known. "In the voice of the thunder", says Darmesteter, "the Greeks recognised the warning of a god which the wise understand, and they worshipped it as *Ossa Dios aggelos*, 'the Word, Messenger of Zeus;' the Romans worshipped it as a goddess, Fama; Indra adores it as 'the Voice in the cloud,' Vāk Āmbhṛṇī, which issues from the waters, from the forehead of the father, and hurls the deadly arrow against the foe of Brahman. So the

---

* Thomas, *Hymns from the Rigveda*, p. 88.

word from above is either a weapon that kills, or a revelation that teaches."* What is said of Vāg Āmbhṛṇī is not exactly correct.

This hymn thus antedates the Greek doctrine of Logos by some centuries. "Vāk appears in RV. as an active female divine power showing grace to mortals. In the Brahmanic period Vāk becomes more and more like the Greek Logos, and it may truthfully be said that in this period "the Word was God." "In Greece," says Hopkins "the conception of Logos begins with Heraclitus, passes on to the Stoics ; is adopted by Philo; becomes a prominent feature of Neo-Platonism; and reappears in the Gospel of St. John. It is certainly legitimate to suppose that Heraclitus might have received the idea indirectly, if not directly, from contemporary Eastern Philosophers."

In early Babylonian religion also "the Word was exalted by higher religion to a great cosmic divine agency, sometimes personified."

This is probably the best known hymn of RV. in Bengal and has its ritual application in the Durgāpūjā as well as in the recitation of the Caṇḍī or Saptaśati. Hymns in which the first person is used are known as *ādhyātmika*†. Such hymns are rare. This is an आध्यात्मिक hymn. The other well-known आध्यात्मिक hymns are x. 48-49 and x. 119 in all of which Indra is the speaker. In the case of आध्यात्मिक hymns the seer is the same as the deity ("उत्तमस्य तु वर्गस्य य ऋषिः सैव देवता।")

---

* SBE, Vol. IV, p. lxxviii.

† तास्त्रिविधा ऋचः—परोचकृताः प्रत्यचकृता आध्यात्मिकाश्च। तत्र परोचकृताः सर्वाभिर्नामविभक्तिभिर्युज्यन्ते, प्रथमपुरुषयैश्याख्यातस्य। इन्द्रो दिव इन्द्र ईशे पृथिव्याः [१०।१८३०]। ..... अथ प्रत्यचकृता मध्यमपुरुषयोगास्त्वमिति चैतेन सर्वनाम्ना। त्वमिन्द्र बलादधि [१०।१५३।२], वि न इन्द्र मृधो जहि [१०।१५२।४] इति।...अथाध्यात्मिकाश्च उत्तमपुरुषयोगा अहमिति चैतेन सर्वनाम्ना। यदीतदिन्द्रो वैकुण्ठः [१०।४८-४९] सवमृजं [१०।१११८] वागाम्भृणीयम् [१०।१२५] इति। परोचकृताः प्रत्यचकृताश्च मत्वा भूयिष्ठाः, अल्पम् आध्यात्मिकाः।

॥ श्रीः ॥

DEVĪ-SŪKTA

x. 125

म० १०

सू० १२५

आम्भृणी वाक् ऋषिः। परमात्मा देवता। १, ३-८—विष्टुप्; २—जगती।

1

अहं रुद्रेभिर्वसुभिश्चरा-
म्यहमादित्यैरुत विश्वदेवैः।
अहं मित्रावरुणोभा बिभ-
र्म्यहमिन्द्राग्नी अहमश्विनोभा ॥१॥

अहम् | रुद्रेभिः | वसुऽभिः | चरामि |
अहम् | आदित्यैः | उत | विश्वऽदेवैः।
अहम् | मित्रावरुणा | उभा | बिभर्मि |
अहम् | इन्द्राग्नी इति | अहम् |
अश्विना | उभा ॥१॥

I (*ahám*) go about (*carāmi*) with the Rudras (*Rudrébhiḥ*), with the Vasus (*Vásubhiḥ*), I (*ahám*) with the Ādityas (*Ādityáiḥ*) and (*utá*) with the All-gods (*viśvá-devaiḥ*); I (*ahám*) bear (*bibharmi*) both (*ubhā́*) Mitra and Varuṇa (*Mitrā́-Váruṇā*), I (*ahám*) Indra and Agni (*Indrāgnī́*), I (*ahám*) both (*ubhā́*) Aśvins (*Aśvínā*).

अहमित्यष्टर्चं त्रयोदशं सूक्तम्। अम्भृणस्य महर्षेर्दुहिता वाङ्नाम्नी ब्रह्मविदुषी स्वात्मानमस्तौत्। अतः सर्षिः। सच्चित्सुखात्मकः सर्वगतः परमात्मा देवता। तेन ह्येषा तादात्म्यमनुभवन्ती सर्वजगद्रूपेण सर्वस्याधिष्ठानत्वेन चाहमेव सर्वं भवामीति स्वात्मानं स्तौति। द्वितीया जगती, शिष्टाः सप्त त्रिष्टुभः। तथा चानुक्रान्तम्—'अहमष्टौ वागाम्भृणी* तुष्टावात्मानं द्वितीया जगती' इति। गतो विनियोगः।

---

* Ṣaḍgurušišya evidently reads वाङ्नामाम्भृणी for he explains: वाङ्नामाम्भृणी। अम्भृणस्य महर्षेः पुत्री। आत्मानं तुष्टाव। स्वयमेवर्षिका देवता चेत्यर्थः।

अहं सूक्तस्य द्रष्ट्री वागाम्भृणी यद् ब्रह्म जगत्कारणं तद्रूपा भवन्ती रुद्रेभिः रुद्रैरेकादशभिः। इत्थम्भावे तृतीया। तदात्मना चरामि। एवं वसुभिः इत्यादौ तत्तदात्मना चरामीति योज्यम्। तथा मित्रावरुणा मित्रञ्च वरुणञ्च। 'सुपां सुलुक्°' [७।१।३९] इति द्वितीयाया आकारः। उभा उभौ अहम् एव ब्रह्मीभूता* बिभर्मि धारयामि। इन्द्राग्नी अपि अहम् एव धारयामि। उभा उभौ अश्विना अश्विनौ अपि अहम् एव धारयामि। मयि हि सर्वं जगच्छुक्तौ रजतमिवाध्यस्तं सद् दृश्यते। माया च जगदाकारेण विवर्तते। तादृश्या मायाया आधारत्वेनासङ्गस्यापि ब्रह्मण उक्तस्य सर्वस्योपपत्तिः† ॥१॥

अथर्ववेदभाष्यम्। 'अहं रुद्रेभिः' इति सूक्तेन जातकर्मणि शङ्खपुष्पिका-गन्ध-पुष्पिके पिष्ट्वा, अभिमन्त्र्य, हिरण्यशकलेन प्राशयेत्। तथा तत्रैव कर्मण्यनेन सूक्तेन शङ्खनाभिं पिप्पलीं च पिष्ट्वा, अभिमन्त्र्य हिरण्यशकलेन प्राशयेत्। तथा मेधाजननार्थं प्रथमं वाग्व्यवहारं कुर्वतः शिशोर्मातुरुत्सङ्गे विहितस्य अनेन सूक्तेनाज्यं हुत्वा तालुनि सम्पातानानयेत्। तथा दधिमधुनी एकत्र कृत्वा अनेन सम्पात्याभिमन्त्र्य शिशुं प्राशयेत्। तथोपनयनकर्मणि दण्डप्रदानानन्तरम् एतत् सूक्तं माणवकं वाचयेत्। तथायुष्कामोऽपि शङ्खपुष्पगन्धपुष्पप्राशनादीन्युक्तानि पञ्च कर्माणि कुर्यात्। तथा च कौशिकं सूत्रम्। अहं रुद्रेभिरिति शुक्लपुष्पे हरितपुष्पे किंस्त्यनाभिपिप्पल्यौ जातरूपशकलेन प्राक् स्तनग्रहात् प्राशयति। प्रथमप्रवदस्य मातुरुपस्थे तालुनि सम्पातान् आनयति। दधिमध्वाशयति। उपनीतं वाचयति। वार्षशतिकं कर्म" [कौ° २।१] इति। तथोपनयनेऽनेन

---

* M. Bombay and Peterson. Some needlessly change ब्रह्मीभूता into ब्रह्मभूता. ब्रह्मीभूता occurs in Śāṅkara Bhāṣya on B. S. i. 3. 15.

† The Gen. in ब्रह्मण: shows that the reading उत्पत्तिः found in all printed works is incorrect. AVS. shows the correct reading.

सूक्तेनाज्यहोमं कुर्यात्। सूक्तितं हुत्वपनयनं प्रक्रम्य "मेधाजननायुष्यैर्जुहुयात्" [कौ ७।८] इति॥ तथाध्यायोत्सर्जनकर्मण्यनेन सूक्तेनाज्यं हुत्वा रसेषु सम्पातानानयेत्। तथा च कौशिकः [१४।३] 'उत्सर्जनम्' प्रक्रम्य "विश्वे देवाः" [१।३०] "अहं रुद्रेभिः" [४।३०] "सिंहे व्याघ्रे" [६।३८] "यशो हविः" [६।३९] इत्यादि॥

सर्वजगत्कल्पनास्पदं सच्चित्सुखात्मकं परं ब्रह्म स्वात्मत्वेन विदुषी अम्भृणाख्यस्य महर्षेर्दुहिता वाङ्नाम्नी ब्रह्मवादिनी स्वात्मानं सर्वात्मभावेन तुष्टाव। तदुक्तं दाशतय्यनुक्रमणिकायाम्- "अहमष्टौ वागाम्भृणी तुष्टावात्मानम्" [सर्वानुक्रमणी] इति। विशुद्धसत्त्वपरिणामरूपस्यान्तःकरणस्य वृत्तिविशेषोऽभिमानात्मकोऽहङ्कारः। तदुपलक्षितानवच्छिन्नात्मिका अहं रुद्रेभिः रुद्रैः एकादशभिः अष्टभिः वसुभिः। इत्थम्भावे तृतीया। तत्तद्देवात्मना चरामि। एवम् अहम् आदित्यैः इत्यादावपि योज्यम्। आदित्या द्वादशसंख्याका धात्रादयः। वसुरुद्रादित्यव्यतिरिक्ता गणशो वर्तमाना विश्वदेवाख्याः। एकस्यैव हि ब्रह्मणस्तत्तदुपाध्यवच्छेदेन वस्वादिदेवतारूपेण भेदावभासात्। वस्तुतस्त्वैक्यमेवेति तदनुरुन्धाना ब्रह्मवादिन्येवं ब्रूते। तथा मित्रावरुणा। 'सुपां सुलुक्' [७।१।३९] इति द्वितीयाया आकारः। मित्रावरुणौ देवौ उभा उभौ अहम् एव परब्रह्मात्मिका बिभर्मि धारयामि। इन्द्राग्नी अपि अहम् एव धारयामि। उभा उभौ अश्विना अश्विनौ अपि अहम् एव धारयामि। मत्स्वरूपे अद्वितीये ब्रह्मणि सर्वं जगत्, शुक्तौ रजतमिव, अध्यस्तं सद् दृश्यते। माया च जगदाकारेण विवर्तते। तदाधारत्वेनासङ्गस्यापि ब्रह्मण उक्तस्य सर्वस्योपपत्तिः॥१॥

दुर्गभाष्यम्। वागाम्भृणीये वागेव ब्रवीति। अहम् एव रुद्रैः वसुभिः आदित्यैः विश्वदेवैः विश्वैश्च देवैः सहभूता चरामि स्तुतिरूपेण। अहम् एव मित्रावरुणा मित्रावरुणौ उभा उभावपि इन्द्राग्नी अश्विना अश्विनौ च उभा उभावपि बिभर्मि हविषा, मत्पूर्वकं हविःसम्प्रदानं सर्वदेवताभ्य इत्यभिप्रायः।

महेश्वरभाष्यम्। वागाम्भृणीयं सूक्तम्। वाग् वैदिकीयम्। आम्भृणस्य महतः फलस्य हेतुभूतेति तत्सम्बन्धिन्याम्भृणी च सा। वाग् आम्भृणीति विशेषण-समासः। वागाम्भृणी आत्मनो महिमानमाचष्टे। असत्यां सम्बन्धिभूतायां मयि* रुद्रादयश्चरन्तः कथं भाषेरन्† मूकास्तिष्ठेयुरित्येवमर्थं स्तुतिभूता वा तेषाम् (?)। अहं रुद्रेभिः रुद्रैः वसुभिः च सह चरामि। अहम् आदित्यैः उत विश्व-देवैः अपि सर्वैर्देवैः। अहम् एव मित्रावरुणौ हविःसम्प्रदानं कुर्वती‡ उभा उभावपि बिभर्मि पुष्णामि। अहम् एव इन्द्राग्नी। अहम् एव अश्विना अश्विनौ उभा उभौ। सर्वत्राकारो द्विवचनस्य स्थाने।

दीपिका। "इह शिष्टानुशिष्टानां शिष्टानामपि सर्वदा। वाचामेव प्रसादेन लोकयात्रा प्रवर्तते॥" इत्यादिवचनशतैः कविभिर्वाचां लोकयात्रामूलकत्वं प्रति-पादितम्। सा च निखिलव्यवहारनिदानं वाक् स्वमहिमानं प्रकटयति—अहमित्या-दिभिरष्टाभिर्ऋग्भिः। यद्यपि "आत्मप्रशंसां परगर्हामिव वर्जयेत्" [आप° ध° सू° १।७।२४] इति जागर्त्यनुशासनं तथापि भक्तजनानुकम्पया भूतार्थकथनं कथमप्यात्म-प्रशंसाकोटौ विनिवेशयितुं न शक्यते, न वा दोषलेशेन स्पृश्यते। ये तावद् गण-देवता रुद्राश्च वसवश्च आदित्याश्च विश्वदेवाश्च सर्वे ते ममैवानुचराः। ये च प्रायेण युग्मश आह्वयन्ते मित्रावरुणौ च इन्द्राग्नी च अश्विनौ च तेऽपि मयैव विधार्यन्ते। "स्तूयमाना हि देवता वीर्येण विवर्धते" 'यस्य ब्रह्म वर्धनं यस्य सोमः" [ऋ° सं° २।१२।६] इत्याद्युक्तेर्देवानां बलप्राणपुष्टिः स्तुत्याहुत्यधीना, स्तुतिराहुतिश्च मन्त्राधीना, मन्त्राश्च वागात्मकाः, अतः सर्वेषां देवानां वागधीनत्वमुपपद्यते। "यदाऽतमस्तन्न दिवा न रात्रिर्न सन्न चासच्छिव एव केवलः। तदक्षरं तत् सवितुर्वरेण्यं प्रज्ञा च तस्मात् प्रसृता पुराणी॥" [श्वेताश्व° ४।१८] इति श्रुति-रप्यक्षरशब्देन मामेव लक्षीकरोति। श्रुत्यन्तरमपि श्रूयताम्—"वागक्षरं प्रथमजा ऋतस्य। वेदानां मातामृतस्य नाभिः। सा नो जुषाणोपयज्ञमागात्। अवन्ती देवी सुहवा मे अस्तु॥" [तै° ब्रा° २।८।८।५] इति॥१॥

रुद्रेभिः—The Maruts are known as Rudras from the name of their father: मरुतां तु गणस्तुत्यै नाम रुद्रा इति स्मृतम् *Bṛhaddevatā* v. 47. In

---

* °भूतायामपि—मुद्रितपाठः। † भवेरन्—मु° पा°। ‡ कुर्वन्ती—मु° पा°

the Brāhmaṇas they become a separate class and their number is eleven. त्रयस्त्रिंशद्वै देवाः सोमपाः। अष्टौ वसव एकादश रुद्रा द्वादशादित्याः प्रजापतिश्च वषट्कारश्च। AB. ii. 4.

वसुभिः—In RV. the Vasus are vague in number and character. They are specially connected with Indra though in later Vedic texts they are specially connected with Agni. In AB., ŚB. and later literature they are eight in number. Of the four instrumentals only वसुभिः is analysed in the Pada-text. In the case of रुद्रेभिः since भिस् comes after a long vowel no अवग्रह is used. आदित्य and विश्वदेव are regarded as म acc. to यचि भम् and not as पद, so the question of अवग्रह does not arise.

आदित्यैः—The Ādityas are the sons of Aditi. They are seven or eight in number in RV. and much more definite than other groups. Varuṇa is the chief of the Ādityas. In RV. ii. 27. 1 six are enumerated: Mitra, Aryaman, Bhaga, Varuṇa, Dakṣa and Aṁśa. In the Brāhmaṇas their number rose to 12. TB. (i. 1. 9. 1) mentions मित्र, वरुण, अर्यमन्, अंश, भग, धातृ, इन्द्र and विवस्वत् as the sons of Aditi. *Cf.* RV. x. 48. 11 आदित्यानां वसूनां रुद्रियाणां देवी देवानां न मिनामि धाम·

आदित्या द्युस्थाना द्वादश। तथा वसवश्चाष्टौ पृथिवीस्थानाः। तथा रुद्रा अन्तरिक्षस्थाना एकादश। Haradatta. See also BU. iii. 9. 2-5.

विश्वदेवैः—"A comprehensive group is formed of the Viśve devāḥ or All-Gods, who occupy an important position in the sacrifices. ...It is a fictitious sacrificial group meant to represent all the gods in order that none should be excluded in laudations intended to be addressed to all. But the All-gods are sometimes conceived as a narrower group, being invoked with other groups, such as the Vasus and Ādityas." MACDONELL, *Vedic Mythology*, p. 130.

The names of the Vasus, Rudras and Ādityas as they appeared in later times are thus given in the *Mahābhārata*:

धरो ध्रुवश्च सोमश्च आपश्चानिलोऽनलः।
प्रत्यूषश्च प्रभासश्च वसवश्चावतस्थिरे॥
मृगव्याधश्च शर्वश्च निर्ऋतिश्च महायशाः।
अजैकपादहिर्बुध्न्यः पिनाकी च परन्तप॥

भवनोऽधेश्वरश्चैव कापाली च विशाम्पते ।
स्थाणुर्भगश्च भगवान् रुद्रास्तवावतस्थिरे ॥
धातार्यमा च मित्रश्च वरुणोऽंशो भगस्तथा ।
इन्द्रो विवस्वान् पूषा च पर्जन्यो दशमः स्मृतः ॥
ततस्त्वष्टा ततो विष्णुरुपेन्द्रो वामनस्तथा ।
इत्येते द्वादशादित्या ज्वलन्तः सूर्यवर्चसः ।
महिमानं पाण्डवस्य कुर्वन्तस्तस्थुरम्बरे ॥

Ṣaḍguruśiṣya on AB. ii. 4.

मित्रावरुणा and अश्विना—the duals are irregular, as आ regularly occurs before consonants and at the end of a pāda in the older part of RV.

बिभर्मि—like a mother; *cf.* मातेव यद् भरसे पप्रथानः v. 15. 4.

अश्विना—The two Aśvins are the surgeons of the gods and benefactors of gods and men. अश्विनौ—यद्वाग्वाते सर्वं रसेनाग्नौ ज्योतिषाग्नेः। अश्वैरश्विनावित्यौर्णवाभः। तत् कावश्विनौ? द्यावापृथिव्यावित्येके। अहोरात्रावित्येके। सूर्याचन्द्रमसावित्येके। राजानौ पुण्यकृतावित्यैतिहासिकाः। *Nir.* xii. 1.

2

अहं सोममाहनसं बिभ-	अहम् | सोमम् | आहनसम् | बिभर्मि ।
र्म्यहं त्वष्टारमुत पूषणं भगम् ।	अहम् | त्वष्टारम् | उत | पूषणम् | भगम् ।
अहं दधामि द्रविणं हविष्मते	अहम् | दधामि | द्रविणम् | हविष्मते ।
सुप्राव्येऽ यजमानाय सुन्वते ॥२॥	सुप्रऽअव्ये | यजमानाय । सुन्वते ॥२॥

I (*ahám*) bear (*bibharmi*) the exciting (*āhanásam*) Soma (*sómam*), I (*ahám*) Tvaṣṭṛ (*Tváṣṭāram*), also (*utá*) Pūṣan (*Pūṣáṇam*) and Bhaga (*Bhágam*). I (*ahám*) bestow (*dadhāmi*) wealth (*dráviṇam*) on the sacrificer (*yájamānāya*) that offers oblation (*haviṣmate*) and that presses Soma (*sunvaté*), deserving of careful protection (*suprāvyé*).

आहनसम् आहन्तव्यमभिषोतव्यं सोमम्। यद्वा, शत्रूणामाहन्तारं दिवि वर्तमानं देवतात्मानं सोमम् अहम् एव बिभर्मि। तथा त्वष्टारम् उत अपि च पूषणम् भगम् च अहम् एव बिभर्मि। तथा हविष्मते हविर्भिर्युक्ताय सुप्राव्ये शोभनं हविर्देवानां प्रापयित्रे* तर्पयित्रे। अवतेस्तर्पणार्थात् 'अवितृस्तृतन्त्रिभ्य ईः' [उ° ३।१५८] इतीकारप्रत्ययः। चतुर्थ्येकवचने यणि 'उदात्तस्वरितयोर्यणः स्वरितोऽनुदात्तस्य' [८।२।४] इति सुपः स्वरितत्वम्। सुन्वते सोमाभिषवं कुर्वते। 'शतुरनुमः°' [६।१।१७३] इति चतुर्थ्या उदात्तत्वम्। ईदृशाय यजमानाय द्रविणम् धनं यागफलरूपमहमेव [दधामि] धारयामि। एतच्च ब्रह्मणः फलदातृत्वं 'फलमत उपपत्तेः' [ब्र° सू° ३।२।३८] इत्यधिकरणे भगवता भाष्यकारेण[1] समर्थितम् ॥२॥

अथर्ववेदभाष्यम्। आहनसम् आहन्तव्यम् अभिषोतव्यं सोमम्, यद्वा शत्रूणाम् आहन्तारं दिवि वर्तमानं देवतात्मानं सोमम् अहम् एव बिभर्मि धारयामि पोषयामि वा। तथा त्वष्टारम् उत अपि च पूषणम् भगम् च एतत्संज्ञान् देवान् अहमेव बिभर्मि। तथा हविष्मते हविर्भिर्युक्ताय सुप्राव्ये शोभनहविर्भिर्देवानां प्राविते तर्पयित्रे। अवतेस्तर्पणार्थात् 'अवितृस्तृतन्त्रिभ्यः'

---

* AVS. shows the correct reading: शोभनहविर्भिर्देवानां प्राविते. *Cf.* वियमानाख्यं for विमानाख्यम् under x. 14, 8.

[1] "'फलम्' 'अतः' ईश्वराद् भवितुम् अर्हति। कुतः? 'उपपत्तेः'। स हि सर्वाध्यक्षः सृष्टि-स्थिति-संहारान् विचित्रान् विदधद् देशकालविशेषामिज्ञत्वात् कर्मिणां कर्मानुरूपं फलं सम्पादयतीत्युपपद्यते।...धर्माधर्मयोरपि हि कारयितृत्वेनेश्वरो हेतुर्व्यपदिश्यते फलस्य च दातृत्वेन —'एष ह्येव साधु कर्म कारयति तं यमेभ्यो लोकेभ्य उन्निनीषते। एष उ एवासाधु कर्म कारयति तं यमधो निनीषते' [कौषी° उ° ३।८] इति। स्मर्यते चायमर्थो भगवद्गीतासु [७।२१-२२]—

'यो यो यां यां तनुं भक्तः श्रद्धयार्चितुमिच्छति।
तस्य तस्याचलां श्रद्धां तामेव विदधाम्यहम् ॥
स तया श्रद्धया युक्तस्तस्याराधनमीहते।
लभते च ततः कामान् मयैव विहितान् हि तान् ॥'

इति। सर्ववेदान्तेषु चेश्वरहेतुका एव सृष्टयो व्यपदिश्यन्ते। तदेव चेश्वरस्य फलहेतुत्वं यत् स्वकर्मानुरूपाः प्रजाः सृजतीति। विचित्रकार्यानुपपत्त्यादयोऽपि दोषाः कृतप्रयत्नापेक्षत्वादीश्वरस्य न प्रसज्यन्ते।" शारीरकभाष्यम्।

[उ° ३।१५८] इति ईकारप्रत्ययः। चतुर्थ्येकवचने यणि 'उदात्तस्वरितयोर्यणः स्वरितोऽनुदात्तस्य' [८।२।४] इत्यनुदात्तस्य सुपः स्वरितत्वम्। सुन्वते सोमाभिषवं कुर्वते। 'शतुरनुमः°' [६।१।१७३] इति विभक्तेरुदात्तत्वम्। ईदृशाय यजमानाय द्रविणम् धनं यागफलरूपम् अहम् एव दधामि प्रयच्छामि, फलमत उपपत्तेः [ब्र° सू° ३।२।३८] इति न्यायेन परब्रह्मणः फलदातृत्वस्य निर्णीतत्वात् ॥२॥

दीपिका। न केवलं गणदेवता युग्मदेवताश्च मदधीनाः, स्वतन्त्रा अपि देवाः सर्वथा मम प्राधान्यमनुरुध्यन्ते। यागविशेषेषु नान्तरीयकतया वर्तमानं समुद्दीपकं सोमं तथा जगद्विधातारं त्वष्टारं पुष्टेः प्रापकं पूषाणं सौभाग्यदैवतं च भगम्, अन्यांश्च तांस्तान् देवान् उक्तन्यायेनाहमेव धारयामि। यश्च यजमानो यथाविधि सोमाभिषवं विधाय मामुद्दिश्य हविः समर्पयति[1], स सर्वथा मदीयं रक्षणमर्हति, अहञ्च तस्मै धनसम्पदं प्रसादीकरोमि। यो यावद् ददाति हविरल्पं वा बहु वा, अहमेव तस्मै तावदेव गवाश्वसुहिरण्यरूपं धनं ददामि, 'यादृगिव वै देवेभ्यः करोति तादृगिवास्मै देवाः कुर्वन्ति' इति न्यायात्। (न केवलं सोमयागेषु वागात्मका मन्वा अपेक्ष्यन्ते, वाचैव स्त्रीभूतया स्त्रीकामेभ्यो गन्धर्वेभ्यः सोमः क्रीयते। एतच्चैतरेय-ब्राह्मणे पञ्चमाध्यायस्य प्रथमे खण्डे प्रपञ्चितम्।) यस्तावत् सर्वात्मना मामुपास्ते स आर्त्विजीनो[2] भवति, ममैव च प्रसादेन प्रभूतं दक्षिणादिकं लभते ॥२॥

आहनसम्—The meaning of the word is doubtful. Here it seems to mean striking, exciting, or foaming, fermenting. Yāska explains आहनसः as आहननवन्तः वधनवन्तः (*Nir.* iv. 16) which is explained by Durga as सम्मोहयितारः causing infatuation or delusion. Under ix. 75. 5 S. says: शत्रूणामभिमुखेन हन्तारः, अभिहन्यमानाः, अभिषूयमाणाः, स्तुतिमन्तः शब्दवन्तो वा.

त्वष्टारम्—"Tvaṣṭṛ is the Hephaistos or Vulcan of the Indian pantheon, the ideal artist, the divine artisan, the most skilful of workmen." (MUIR). "He is the power which shapes the

---

[1] *Cf.* इच्छन्ति देवाः सुन्वन्तं न स्वप्नाय स्पृहयन्ति। यन्ति प्रमादमतन्द्राः॥ viii. 2. 18.

[2] यो वा इमां पदशः स्वरशोऽक्षरशो वाचं विदधाति स आर्त्विजीनो भवति। *Mahābhāṣya* (ed. Kielhorn), Vol. I, p. 3.

germ in the womb for men and animals alike: he fashions husband and wife for each other from the womb and presides over generations." (KEITH).

भगम्—The god of fortune and one of the Ādityas. Av. *bagha* god.

द्रविणम्—AV. reads the pl. द्रविणा for द्रविणम्.

हविष्मते—not analysed in the Pada-text because हविस् is a भ here and not a पद. *Cf.* x. 48. 4: पुरु सहस्रा नि शिशामि दाशुषे यन्मा सोमास उक्थिनो अमन्दिषुः।

सुप्राव्ये—As Geldner points out सुप्रावीः in ii. 26. 1 is explained by प्रविद्धि in the next stanza. S. derives it from अव् to aid, western scholars evidently derive it from वी 'to lead, guide' and think the word means 'well-advised', 'well-prompted.' The analysis in the Padapāṭha is peculiar. As प्रावीः occurs several times, सु has evidently been compounded with प्रावीः; so we should expect the avagraha after सु, but we find the avagraha after सुप्र. The *Atharva-Veda-Prātiśākhya* notes the peculiarity in its rule: सुप्राव्या च iv. 11. In our stanza AV. reads सुप्राव्या which Bloomfield regards either as the feminine Nom. sing. or neut. Acc. plural of सुप्राव्य but which the com. on the *Atharva-Veda-Prātiśākhya* regards as the Inst. sing. of सुप्रावी—अवतेः सुप्रपूर्वस्य टाशब्दः स्वरितः परः। सुप्राव्येति तृतीयायाः सैप्रश्छन्दसि स्मर्यते॥ The opposite of सुप्रावी is दुष्प्रावी iv. 25. 6 (analysed as दुःप्र ऽ अव्यः). देवावी occurs several times in RV.

3

अहं राष्ट्री संगमनी वसूनां
चिकितुषी प्रथमा यज्ञियानाम्।
तां मा देवा व्यदधुः पुरुत्रा
भूरिस्थात्रां भूर्यावेशयन्तीम् ॥३॥

अहम् | राष्ट्री | सम्ऽगमनी | वसूनाम्।
चिकितुषी | प्रथमा | यज्ञियानाम्।
ताम् | मा | देवाः | वि | अदधुः | पुरुऽत्रा
भूरिऽस्थात्राम् | भूरि | आऽवेशयन्तीम् ॥३॥

I (*ahám*) am queen (*rā´ṣṭrī*), gatherer (*saṅgámanī*) of treasures (*vásūnām*), the wise (*cikitúṣī*), first (*prathamā´*) of those that are worthy to be worshipped (*yájñiyānām*). Me (*mā*) as such (*tā´m*) the gods (*devā´ḥ*) have put (*vyádadhuḥ*) in many places (*purutrā´*), making me dwell in many abodes (*bhū´ri-sthātrām*) and enter into (*ā-veśáyantīm*) many (*bhū´ri*).

अहं राष्ट्री। ईश्वर-नामैतत्। सर्वस्य जगत ईश्वरी। तथा वसूनाम् धनानां सङ्गमनी सङ्गमयित्री उपासकानां प्रापयित्री। चिकितुषी यत् साक्षात्कर्तव्यं परं ब्रह्म तज् ज्ञातवती स्वात्मतया साक्षात्कृतवती। अत एव यज्ञियानाम् यज्ञार्हाणां प्रथमा मुख्या। या एवंगुणविशिष्टाहं तां [मा] मां भूरिस्थात्राम् बहुभावेन प्रपञ्चात्मनावतिष्ठमानाम्। भूरि भूरीणि बहूनि भूतजातानि आवेशयन्तीम् जीवभावेनात्मानं प्रवेशयन्तीम् ईदृशीं मां पुरुत्रा बहुषु देशेषु व्यदधुः देवाः विदधति कुर्वन्ति। उक्तप्रकारेण वैश्वरूप्येणाव-स्थानाद्* यद् यत् कुर्वन्ति तत् सर्वं मामेव कुर्वन्तीत्यर्थः ॥३॥

अथर्ववेदभाष्यम्। अद्वितीयब्रह्मात्मिका अहं राष्ट्री। ईश्वरनामैतत्। कृत्स्नस्य दृश्यप्रपञ्चस्य राज्ञी नियन्त्री। अत एव वसूनाम् धनानां सङ्गमनी सङ्गमयित्री उपासकानां फलस्य प्रापयित्री। चिकितुषी यत् साक्षात्कर्तव्यं परं ब्रह्म तज् ज्ञातवती स्वात्मतया साक्षात्कृतवती। कित ज्ञाने [धा° ३।१९] इत्यस्मात् लिटः क्वसुः। तदन्तात् 'उगितश्च' [४।१।६] इति ङीप्। अत एव यज्ञियानाम् यज्ञार्हाणां देवानाम् प्रथमा मुख्या। 'यज्ञर्त्विग्भ्यां घ-खञौ' [५।१।७१] इत्यर्हार्थे घ-प्रत्ययः। तां तादृशीं मा मां भूरिस्थात्राम् बहु-भावेन प्रपञ्चात्मना कृतावस्थानां भूरि बहुलं फलम् आवेशयन्तः उपासकान् प्रापयन्तो देवाः पुरुत्रा बहुषु स्थ ेषु व्यदधुः विदधति कुर्वन्ति। 'देव-मनुष्य-पुरुष-पुरु-मर्त्येभ्यः°' [५।४।५६] इति सप्तम्यर्थे त्रा-प्रत्ययः। उक्तप्रकारेण वैश्व-रूप्येणावस्थानाद् यद् यत् कुर्वन्ति देवास्तत् सर्वं मामेव कुर्वन्तीत्यर्थः ॥३॥

---

* Many printed editions place a full stop here.

दीपिका। अहमेव दिवश्च पृथिव्याश्चेशे, अहमेव द्विपदश्चतुष्पदश्चेशे। ममैव प्रशासने सूर्याचन्द्रमसौ विधृतौ तिष्ठतः, ममैव प्रशासने द्यावापृथिव्यौ विधृते तिष्ठतः, ममैव प्रशासने निमेषा मुहूर्त्ता अहोरात्रा अर्धमासा मासा ऋतवः संवत्सरा विधृतास्तिष्ठन्ति, ममैव प्रशासने सागराः सरितः सरस्वश्च सम्यक् स्यन्दन्ते, किं बहुना समग्रस्य ब्रह्माण्डस्य सम्राडहमेवास्मि। दिवि वा भुवि वा यानि मणिरत्नानि विलसन्ति तानि सर्वाणि मदायत्तानि। देवेषु मनुजेषु च ये धनिकधुरीणास्तेषामपि मनोरथानामप्यभूमिर्या सम्पत् सापि ममैव वशे वर्तते। अत एव च "वाग् वै वसिष्ठा" इति [श° ब्रा° १४।९।२।२] श्रुतिर्मां वसिष्ठेति व्यपदिशति। मम भक्तेषु यो य ऐश्वर्यं कामयते तं तं तेन योजयामि। किञ्च भूतं भवद्भविष्यच्च व्यवहितं विप्रकृष्टञ्च सर्वमेव करामलकवत् पश्यामि, मत्त एव सर्वस्य प्रवृत्तेः। "इदमन्धं तमः कृत्स्नं जायेत भुवनत्रयम्। यदि शब्दाह्वयं ज्योतिरासंसारं न दीप्यते॥" 'न सोऽस्ति प्रत्ययो लोके यः शब्दानुगमादृते। अनुविद्धमिव ज्ञानं सर्वं शब्देन भासते॥" इत्यादिन्यायेन विश्वं समग्रं समुद्भासयिष्यहं सर्वज्ञानानामायतनम्। ये च देवा यज्ञेषु हूयन्ते तेषु च मम प्राथम्यं निर्विवादम्, वाङ्मुखेनैव यज्ञस्य प्रवृत्तेः। अहं तावत् तेषु तेषु प्राणिजातेषु नानाभावेनावस्थिता। सरीसृपाणां स्फुरितेषु विहगानां कूजितेषु पशूनां वाशितेषु नराणां च भाषितेषु ममैवाभिव्यक्तिर्भवति। सुसंस्कृता च वाक् प्रथमतो मन्त्रेष्वेवावस्थिता ततश्च वेदानां समनुशीलनेन तस्या बहुलप्रचारः समजनि, एवम् ऋषिषु प्रविष्टाहं देवैर्बहुधा प्रचारिता। तदेतदृषिणाप्युक्तम्—

यज्ञेन वाचः पदवीयमायन् तामन्वविन्दन्नृषिषु प्रविष्टाम्।
तामाभृत्या व्यदधुः पुरुत्रा तां सप्त रेभा अभि सं नवन्ते॥ इति॥३॥

राष्ट्री—fem. of राष्ट्र formed with अन् from राज्. *Cf.* जोष्ट्री. Under viii. 100. 10 यद्वाग् वदन्त्यविचेतनानि राष्ट्री देवानां निषसाद मन्द्रा। चतस्र ऊर्जं दुदुहे पयांसि क्व स्विदस्याः परमं जगाम॥ "When, uttering words that no one comprehended, Vāk, Queen of Gods, the Gladdener, was seated, the heaven's four regions drew forth drink and vigour: now whither hath her noblest portion vanished?" S. explains it as राजनशीला. Under AV. iv. 1. 2 S. says: ईश्वरनामैतत्। राज्ञी सर्वजगद्व्यवहारस्य ईश्वरा नियन्त्री। *Cf.* AB. iv. 2 वाग् वै राष्ट्री. Acc. to some scholars राष्ट्री (ruler) is masc. V. G. S., p. 87 top.

सङ्गमनी वसूनाम्—*cf.* TS. iii. 5. 1. 1 निवेशनी सङ्गमनी वसूनां विश्वा रूपाणि वसुन्याविशयन्ती 'holder and gatherer of riches, clad in all rich forms' (K). In x. 48. 1 Indra says: अहं धनानि सं जयामि शश्वतः. *Cf.* गोभिरश्वेभिर्वसुभिर्हिरण्यैः vii. 90. 6. Some explain, because I am the gatherer up of treasures, therefore I am the first of those that merit worship—काण्वलिङ्ग.

अदधुः पुरुत्रा—*Cf.* RV. x. 71. 3 यज्ञेन वाचः पदवीयमायन् तामन्वविन्दन्नृषिषु प्रविष्टाम्। तामाभृत्या व्यदधुः पुरुत्रा तां सप्त रेभा अभि सं नवन्ते॥ "With sacrifice the track of Vāk they followed, and found her harbouring with the Ṛṣis. They brought her, dealt her forth in many places: seven singers make her tone resound in contrast." "Both stanzas are, in reality, addressed to Vāc 'speech', the ātmastuti 10. 125 containing, perhaps, the later elaboration of the idea." *Repetitions.*

पुरुत्रा—Note that though त्र and त्रा are added in practically the same sense (V. G. S., p. 213), त्रा is accented while त्र (त्रल्) accents the immediately preceding syl. In the Pada-text also त्रा is separated by अवग्रह, but त्र is not so separated. "Doubtless it is the character of the form to which त्र is attached, as being pronominal roots, that prevents its separation from them, rather than anything in the suffix itself." The suffix त्र is preserved in Beng. देवोत्तर which is formed by popular etymology from देवत्रा. Skt. *purú-*, Av. *pouru-*, O. P. *paru-*, Gk. *polús* (from **palus*), Lith. *pilus*, I.E. **pl̥lús*.

भूरिस्थात्राम्—occurs only here in RV. The accent shows that it is a बहुव्रीहि compound, like *bhū́ri-śṛṅga* many-horned, *bhū́ri-karman*, etc. भूरि being formed with the उणादि suffix क्रिन् (अदि-शदि-भू-शुभिभ्यः क्रिन् iv. 65) is accented on the first syl. lit. 'becoming more and more, increasing,' hence abundant. स्थात्र is formed in the अधिकरण-वाच्य and means station, place. The suffix त्र (ष्ट्रन्) was originally the primary ending त with a secondary अ and was generally added in the करण- or अधिकरण-वाच्य.

आवेशयन्तीम्—*Cf.* अनेन जीवेनात्मनानुप्रविश्य—छा. ६।३।२. AV. reads आवेशयन्तः which qualifies देवाः. TS. iii. 5. 1. 1 however, reads आवेशयन्ती.

4

मया सो अन्नमत्ति यो विपश्यति	मया | सः | अन्नम् | अत्ति | यः | विऽपश्यति।
यः प्राणिति य ईं शृणोत्युक्तम्।	यः | प्राणिति | यः | ईम् | शृणोति | उक्तम्।
अमन्तवो मां त उप क्षियन्ति	अमन्तवः | माम् | ते | उप | क्षियन्ति।
श्रुधि श्रुत श्रद्धिवं ते वदामि ॥४॥	श्रुधि | श्रुत | श्रद्धिऽवम् | ते | वदामि ॥४॥

By me (*máyā*) he (*sáḥ*) eats (*atti*) food (*ánnam*) who (*yáḥ*) sees (*vipáśyati*), who breathes (*yáḥ prā́ṇiti*), who (*yáḥ*) hears (*śṛṇóti*) what is spoken (*im uktám*). Unknowing (*amantávaḥ*), they (*té*) dwell (*úpakṣiyanti*) on me (*mām*). Hear (*śrudhí*), O illustrious one (*śruta*). That which is creditable (*śraddhivám*), I say (*vadāmi*) unto you (*te*).

योऽन्नमत्ति स भोक्तृशक्तिरूपया मया एव अन्नमत्ति। यः च विपश्यति आलोकयतीत्यर्थः। यः च प्राणिति श्वासोच्छ्वासादिव्यापारं करोति सोऽपि मयैव। यः च [ईम्] उक्तं शृणोति। श्रु श्रवणे [धा° १।९२४]। 'श्रुवः श्रृ च' [३।१।७४] इति श्रुधातोः श्रृ-भावः। य ईदृशीमन्तर्यामिरूपेण स्थितां मां न जानन्ति ते अमन्तवः अमन्यमाना अजानन्त उपक्षियन्ति उपक्षीणाः संसारेण हीना भवन्ति। मनेरौणादिकस्तु-प्रत्ययः। नञ्समासे व्यत्ययेनान्तोदात्तत्वम्। यद्वा भावे तु-प्रत्ययः। ततो बहुव्रीहौ 'नञ्सुभ्याम्' [६।२।१७२] इत्युत्तरपदान्तोदात्तत्वम्। माम् अमन्तवः मद्विषयज्ञानरहिता इत्यर्थः। हे श्रुत विश्रुत सखे, श्रुधि मया वक्ष्यमाणं शृणु। छान्दसो विकरणस्य लुक्। 'श्रुशृणुपृकृवृभ्यः°' [६।४।१०२] इति हेर्धिभावः। किं तच्छ्रोतव्यम्? श्रद्धिवम्। श्रद्धिः श्रद्धा तया युक्तम्। श्रद्धायत्नेन लभ्यमित्यर्थः। 'श्रदन्तरोरुपसर्गवद्वृत्ति'रिष्यते [३।३।१०६ का*] इति श्रच्छब्दस्योपसर्गवद्वर्त्तमानत्वात् 'उपसर्गे घोः किः' [३।३।९२] इति किप्रत्ययः। मत्वर्थीयो वः। ईदृशं ब्रह्मात्मकं वस्तु ते तुभ्यं वदामि उपदिशामि ॥४॥

---

* वक्तव्या Mallinātha on *Śiś.* viii. 11. This is not found in *Mahābhāṣya*. M³. wrongly gives the reference as i. 4. 57. 2.

अथर्ववेदभाष्यम्। यः भोक्तृजनः अन्नम् अत्ति सः भोक्तृशक्तिरूपया मया एव अन्नम् अत्ति। यः च जनः विपश्यति विविधं जगत् चक्षुषा साक्षात्-करोति। यः च प्राणिति श्वासोच्छ्वासादिव्यापारं करोति। अन प्राणने [धा° २।६०]। अदादित्वाच्छपो लुक्। 'रुदादिभ्यः सार्वधातुके' [७।२।७६] इतीडागमः। 'अनितेः' [८।४।१९] इति णत्वम्। ईम् इदम् उक्तं स्वरूपं यः च पुरुषः शृणोति श्रोत्रेन्द्रियेण गृह्णाति ते सर्वेऽपि तत्तच्छक्त्यात्मना अवस्थितया मयैव तत्तद्व्यापारं कुर्वन्तीत्यर्थः। शृणोतीति। श्रु श्रवणे [धा° १।९२४]। 'श्रुवः शृ च' [३।१।७४] इति इनुप्रत्ययः धातोः शृभावश्च। य ईदृशीम् अन्तर्यामिरूपेण स्थितां मां न जानन्ति ते माम् अमन्तवः अमन्यमाना अजानाना मद्विषयज्ञानरहिताः उप क्षियन्ति उपक्षीणाः संसारेण निहीना भवन्ति। मनेरौणादिकस्तुप्रत्ययः। नञ्समासे [ब्यत्यये] नान्तोदात्तत्वम्। यद्वा भावे तु-प्रत्ययः। ततो बहुव्रीहौ 'नञ्सुभ्याम्' [६।२।१७२] इत्युत्तरपदान्तोदात्तत्वम्। हे श्रुत विश्रुत हे सखे श्रुधि मयोक्तं शृणु। छान्दसो विकरणस्य लुक्। 'श्रुशृणुपृकृवृभ्यः°' [६।४।१०२] इति हेर्धिभावः। अहं ते तुभ्यं श्रद्धेयं श्रद्धा-तव्यम्। श्रद्धा भक्तिः। तया प्राप्यं परतत्त्वस्वरूपं वदामि उपदिशामि। श्रद्धेयम् इति। 'अचो यत्' [३।१।९७] इति धाञो यत्प्रत्ययः। 'ईद्यति' [६।४।६५] इतीकारः ॥४॥

दीपिका। "दिवान्धाः प्राणिनः केचिद्रात्रावन्धास्तथापरे। केचिद्दिवा तथा रात्रौ प्राणिनस्तुल्यदृष्टयः॥" इति न्यायेन ये सम्यग् वा असम्यग् वा पश्यन्ति, ये सम्यग् वा असम्यग् वा शृण्वन्ति, किं बहुना येषामेव प्राणा वर्तन्ते तेषा-माहार्यसम्पादनं मयैव विधीयते। मया प्राणिनः प्राणवन्त इति विद्धि। एते सर्वे मामेवोपजीवन्ति दौर्भाग्यात्तु नैतदवबुध्यन्ते। स्वो हि भावो मनुष्याणामात्मनो हृदयानुमानेन दर्शनं नाम। सत्यसंहिताश्च देवाः, अनृतसंहिता मनुष्याः।[1] तन्नैतदाश्चर्यं यत् सर्वं सत्यं वदितुमसमर्थस्त्वं मामप्येवं-

[1] AB. i. 6.

वादिनीं न श्रद्धास्यसि। तत् तु न समीचीनं स्यात्। सत्कार्यपरम्परया प्रज्ञाप्रकर्षेण च शारदसुधाकरसमुज्ज्वलं यशःपटलं त्वया समधिगतम्, उपदेश-भाजनत्वं च समासादितम्। अतः सर्वथा सत्यमेवैतत् ते पुरतो विवृणोमि, मास्तु ते विशङ्का भूत्। न खलु 'अम्बुनि मज्जन्त्यलाबूनि ग्रावाणः प्लवन्ते' इतिवद् व्यामोहकम्, न वा 'शिखा ते वर्धते वत्स गुडूचीं श्रद्धया पिब' इतिवत् प्ररोचकम् अश्रद्धेयं किमपि प्रलपामि। प्रायेण त्वयापि बहुशः प्रत्यक्षीकृतं यद् वाच उत्क्रान्तौ शरीरं काष्ठकुड्यकल्पं सम्पद्यते, दर्शनस्य श्रवणस्य प्राणनस्य च वार्ताप्यस्तमेतीति। तथा च श्रुतिः—"वाचं देवा उपजीवन्ति विश्वे। वाचं गन्धर्वाः पशवो मनुष्याः। वाचीमा विश्वा भुवनान्यर्पिता।" [तै° ब्रा° २।८।८।४] इति। "वागग्रेगा अग्र एत्वृजुगा देवेभ्यो यशो मयि दधती, प्राणान् पशुषु, प्रजां मयि च यजमाने च।" [तै° सं° ३।१।१०।२] इति। "वाग् वै शर्म" [ऐ° ब्रा° १०।८] इति च ॥४॥

मया सो अन्नमत्ति—Both here and under AV. iv. 30. 4 S. supplies a यः which he construes with अत्ति and explains—he who eats food does so through me, etc. This अध्याहार to preserve symmetry is, however, a bit far-fetched. Vāk is solicited for food and vigour in viii. 100. 11 देवीं वाचमजनयन्त देवास्तां विश्वरूपाः पशवो वदन्ति। सा नो मन्द्रेषमूर्जं दुहाना धेनुर्वागस्मानुप सुष्टुतैतु॥ 'The gods generated Vāk the goddess, animals of all forms speak her. May she, the Gladdener, yielding food and vigour, the milch cow Vāk, properly praised, approach us.' *Cf.* x. 48. 1 अहं दाशुषे विभजामि भोजनम्.

For सो अन्नमत्ति AV. has सोऽन्नमत्ति. The metre shows that the RV. form is original.

विपश्यति—*Cf.* x. 187. 4 यो विश्वाभि विपश्यति भुवना सं च पश्यति।

प्राणिति—Note that it is not analysed in the Pada-text.* AV. reads प्राणति for प्राणिति. Similarly we have in AV. यच्च प्राणति यच्च न though SB., TB. and BU. show the normal प्राणिति. Similarly SB. has कति ह्येव प्राणिति चाप चानिति where GB. has प्राणति चापानति च. No

* "प्राणोऽपानति नेङ्गेरते प्रापाभ्यां दीर्घसंश्रयात्।"

wonder that we should find forms like विन्दसेत्, आन्दसेयुः, etc., in class. Skt.

ईम्—anticipates उक्थम्.

अमन्तवः—अमन्तु occurs in x. 22. 8 also: अकर्मा दस्युरभि नो अमन्तुरन्यव्रतो अमानुषः। "Around us is the Dasyu, riteless, void of sense, inhuman, keeping alien laws."

श्रुत—S. appears to be right in regarding it as a vocative. Most European scholars think it is the 2. plural root-aorist imperative of श्रु. Peterson translates: "Listen, one and all, this is a true thing I say." This is ingenious but not at all convincing. Though both finite verbs and vocatives are liable to loss of accentuation, श्रुत as a finite verb would have been accented as beginning a new sentence. Pāṇini distinctly says तिङ्ङतिङः, *i.e.*, a finite verb is unaccented *except after a finite verb*. And the plural श्रुत almost immediately followed by the singular ते would be singularly inappropriate. Ludwig in his commentary takes श्रुतश्रद्धिवम् as one word and explains what is worthy of credence acc. to tradition. In his translation he takes श्रुत as the 2. pl. imperative of श्रु.

श्रद्धिवम्—worthy of credence, true. It is a peculiar form with the sense of a gerundive. It had already become rare in the Vedic period and AV. substitutes the more usual श्रद्धेय for it.

5

अहमेव स्वयमिदं वदामि
जुष्टं देवेभिरुत मानुषेभिः।
यं कामये तंतमुग्रं कृणोमि
तं ब्रह्माणं तमृषिं तं सुमेधाम् ॥५॥

अहम् | एव | स्वयम् | इदम् | वदामि।
जुष्टम् | देवेभिः | उत | मानुषेभिः।
यम् | कामये | तम्ऽतम् | उग्रम् | कृणोमि।
तम् | ब्रह्माणम् | तम् | ऋषिम् |
तम् | सुऽमेधाम् ॥५॥

I of my own self (*ahám evá svayám*) say (*vadāmi*) this (*idám*), welcome (*júṣṭam*) to gods (*devébhiḥ*) and (*utá*) men (*mā´nuṣebhiḥ*): whomsoever (*yám*) I desire (*kāmáye*) him (*tám-tam*) I make (*kṛṇomi*) mighty (*ugrám*), him (*tám*) priest (*Brahmā´ṇam*), him (*tám*) the seer (*ṛ´ṣim*), him (*tám*) the sage (*su-medhā´m*).

अहं स्वयमेव इदम् वस्तु ब्रह्मात्मकं वदामि उपदिशामि। देवेभिः देवैरिन्द्रादिभिरपि जुष्टम् सेवितम्। उत अपि च मानुषेभिः मनुष्यैरपि जुष्टम्। ईदृग्वस्वात्मिकाहं कामये यं पुरुषं रक्षितुमहं वाञ्छामि तंतम् पुरुषम् उग्रं कृणोमि सर्वेभ्योऽधिकं[1] करोमि। तम् एव ब्रह्माणम् स्रष्टारं करोमि। तम् एव ऋषिम् अतीन्द्रियार्थदर्शिनं करोमि। तम् एव सुमेधाम् शोभनप्रज्ञं करोमि ॥५॥

अथर्ववेदभाष्यम्। अहं स्वयमेव आत्मनैव। [एवकारः] 'नान्योऽस्ति ममोपदेष्टा' इत्यवधारणार्थः। इदम् आपरोक्ष्येणानुभूयमानं ब्रह्मात्मकं वस्तु वदामि लोकहितार्थम् उपदिशामि। तद् विशेष्यते। देवानाम् इन्द्रादीनां जुष्टं प्रियम् उत मानुषाणाम् मनुष्याणामपि प्रियम् परानन्दरूपत्वात्। 'एतस्यैवानन्दस्यान्यानि भूतानि मात्रामुपजीवन्ति' [बृ° आ° ४।३।३२] इति श्रुतेः। यद्वा देवमनुष्यादिभिः सेवितम् इदं वक्ष्यमाणं मदीयं माहात्म्यम् अहम् एव स्वयम् वदामि प्रकटयामीत्यर्थः। किं पुनस्तद् इत्याह—यम् इति। यं कामये। तंतम् इति प्रतिनिर्देश्यस्य वीप्सितत्वाद् अत्रापि वीप्सा द्रष्टव्या। यंयं पुरुषं रक्षितुम् अहं वाञ्छामि तंतं कृत्स्नं पुरुषम् उग्रं कृणोमि। सर्वेभ्योऽधिकं[1] दुष्प्रधर्षं करोमि। यद्वा उग्रः ईश्वरः। जगन्निर्माणसमर्थमीश्वरं करोमि। तम् एव ब्रह्माणं स्रष्टारं करोमि, तथा तम् ऋषिम् अतीन्द्रियार्थदर्शिनं करोमि, तम् एव सुमेधाम् शोभनप्रज्ञं च करोमि। एवं सर्वजगन्नियन्तृ-ब्रह्मात्मकत्वं स्वात्मन्याविष्कृतम् ॥५॥

---

[1] Strict grammar as well as logic requires सर्वेष्वधिकम् or इतरेभ्यः सर्वेभ्योऽधिकम्. *Cf.* सर्वसौमन्तिनीभ्यश्च सीतां सौमन्तिनीं वराम् Rām. ii. 16. 40.

दीपिका। देवानां मनुष्याणाञ्च प्रियमिदं रहस्यं भक्तजनानुकम्पया स्वयमेव सुहृद्भूय विवृणोमि। अतोऽस्य सत्यतायां लेशतोऽपि संशयो न कार्यः। भक्ताश्चोपासकाश्च भक्तिप्राग्भारविवशीकृतस्वान्ताः सर्वथा विचारविधुरा भजनीयस्य परमाणुप्रमाणानपि गुणान् पर्वतीकुर्वन्ति। आश्रिताश्च शरणागताश्च शरण्यस्य सौमनस्यमेवाधिगन्तुकामास्तस्य प्रशंसायां सहस्रमुखतामात्मन आविष्कुर्वन्ति, न च गणयन्त्युत्कटतममप्यतिशयोक्तिजातम्। दूताश्च स्वभावत एव यथाभूतं वस्तुतत्त्वं विपर्यासयन्ति। 'नाहं दूती तनोस्तापस्तस्याः कालानलोपमः' इत्यालङ्कारिकाणामुदाहरणमेवात्र साक्षिभूयमावहति। परं स्वप्नेऽपि भ्रमप्रमादविप्रलिप्साकरणापाटवादिभिरनाक्रान्तायाः परापराणां परमया परमेश्वर्या मया यदुच्यते, देवानां मनुष्याणां च हितकाम्यया तेषां हृदयाह्लादकरं यदुपदिश्यते, सर्वथा श्रद्धेयतममेव तत्।

जगतीतलस्थं निखिलं बलं च प्रज्ञानं च मदधीनमेव। देवो वा मर्त्यो वा य एव बलं कामयते स चेन्मे बहुमतस्ततस्तमोजिष्ठं बलिष्ठं च विदधामि, येन सुरेषु वाप्यसुरेषु वा, नरेषु वा पशुषु वा नैव प्रभवति कोऽपि तमभिभवितुम्। यो वा 'धिग् बलं क्षत्रियबलं ब्रह्मतेजोबलं बलम्' इति मन्यमानः शारीरं शौर्यं श्वापदचेष्टितं समाकलयन् सर्वथा तत्स्थाविरहितः परलोकसाधनीं प्रज्ञां प्रार्थयते तस्य भक्तेः कर्मणश्च तारतम्येन तं सर्वजनवरणीयं बृहस्पतिप्रतिमं पुरोधसं वा विदधामि, भूपालकुलललितचरणयुगलम् इन्द्रादीनामपि 'युज्यं' सखायं मन्त्रद्रष्टारं वा सम्पादयामि, सर्वत्रैवाप्रतिहतमतिप्रसरमतीन्द्रियाणामपि भावानां समवेक्षितारं त्रिभुवनशरण्यं देवदानवादिसर्वसत्त्ववरेण्यं वा विदधामि। सर्वरूपा मदीयेच्छैवात्र नियामिका, यदेवेच्छामि तदेव तदात्व एव सत्यं सञ्जायते। सर्वथा भक्तानां कल्पलतैवास्मि। श्रुतिरप्येतदेव समुद्घोषयति—"यामृषयो मन्त्रकृतो मनीषिणः। अन्वैच्छन् देवास्तपसा श्रमेण। तां देवीं वाचं हविषा यजामहे। सा नो दधातु सुकृतस्य लोके॥" [तै° ब्रा° २।८।८।४] इति। "वाचं धेनुमुपासीत। तस्याश्चत्वारः स्तनाः—स्वाहाकारो वषट्कारो हन्तकारः स्वधाकारः। तस्यै द्वौ स्तनौ देवा उपजीवन्ति—स्वाहाकारं च वषट्कारं च, हन्तकारं मनुष्याः, स्वधाकारं पितरः, तस्याः प्राण ऋषभो मनो वत्सः।" [बृ° आ° ५।८।१] इति च॥५॥

BCU 2641

स्वयम्—from the stem *svai* after the analogy of अयम्, though popularly it is dissolved as सु अयम् on the principle सर्वः कान्तमात्मीयं पश्यति.

जुष्टम्—Note that unlike most past participles जुष्ट is accented on the first syl. नित्यं मन्त्रे ६।१।२१० (following जुष्टार्पिते चच्छन्दसि ६।१।२०९). As the word is found thrice accented on the second syl. in AV. later grammarians repudiate the rule नित्यं मन्त्रे and stick to जुष्टार्पिते चच्छन्दसि. It was probably because जुष्ट lost the sense of a participle and came to be used as an ordinary adjective in the sense of 'agreeable, pleasing' that the accent was shifted. *Cf.* धूर्त which is evidently a past participle (उ° ३।८६) but which along with इन्न, गर्त, मर्त, etc., is accented on the first syl.

दैवैभिरुत मानुषेभिः—AV. reads देवानामुत मानुषाणाम्. When क्त is added to denote past time the Instr. is used in connexion with it, when it denotes present time the Gen. is used acc. to क्तस्य च वर्तमाने 2. 3. 67. जुष्ट is read in the list of words with क्त denoting present time :

> गोलितो रचितः चान्त आकुष्टो जुष्ट इत्यपि।
> रूटश्च रुषितश्चोभावभिव्याहृत इत्यपि॥
> हृष्टतुष्टौ तथाक्रान्तस्वथोभौ संयतोद्यतौ।
> कष्टं भविष्यतीत्याद्दरस्मृताः पूर्ववत् स्मृताः॥

Mahābhāṣya, 3. 2. 188. The Dat. is also often used with जुष्ट (क्रियायोगे चतुर्थी or रुच्यर्थानां प्रीयमाण इति चतुर्थी) : *e.g.*, जुष्टं जनाय दाशुषे i. 44. 4.

ततम्—Rhetoricians point out that the repetition of यत् makes the repetition of तत् unnecessary; the same, however, can hardly be said of तत् which is not उद्देश्य but प्रतिनिर्देश्य. Because of the वीप्सा of तत् we are to understand another यम् after यम्.

तम्—there will be अनुषङ्ग of one तम् from तं तमुग्रं, etc., in each case—तं तं ब्रह्माणम्, etc. *Cf.* CU. v. 10. 6 यो यो ह्यन्नमत्ति यो रेतः सिञ्चति etc.

ब्रह्माणम्—superintending priest. "तथैव विद्यया ब्रह्मत्वं कुर्यात्।" See *Vedic Index*, II. 77-78. *Cf.* तमेव ऋषिं तमु ब्रह्माणमाहुर्यज्ञन्यं सामगामुक्थ-

G 2764

शासम् x. 107. 6 (तमेव दक्षिणाया दातारम् ··· यज्ञन्यम् ... अध्वर्युम्, सामगां साम्नां गातारम् ... उक्थशासं होतारम्. S.)

सुमेधाम्—occurs also in प्र सप्तगुप्ततधीतिं सुमेधां हृहस्पतिं मतिरच्छा जिगाति x. 47. 6.* It is evidently a contracted form of सुमेधसम् for metrical reasons. See Lanman's *Noun-Inflection in the Veda*, p. 552, *Alt-indische Grammatik*, III, 284 *β*. Skt. *medhā'*, Av. *mazdā*, from **maz-dhā* from **mṇdh-tā*.

सुमेधाम् appears like an anticlimax after ब्रह्माणम् and ऋषिम् who certainly can never be accused of lacking in मेधा. Can we not regard the last तम as पूरण and construe सुमेधाम् with ऋषिम् or with both ब्रह्माणम् and ऋषिम् ? The figure of speech will then be सार or climax. (उत्तरोत्तरमुत्कर्षो वस्तूनां सार इष्यते।)

6

अहं रुद्राय धनुरा तनोमि	अहम् | रुद्राय | धनुः | आ | तनोमि ।
ब्रह्मद्विषे शरवे हन्तवा उ ।	ब्रह्मऽद्विषे | शरवे | हन्तवै | ऊँ इति ॥
अहं जनाय समदं कृणो-	अहम् | जनाय | सऽमदम् | कृणोमि ।
म्यहं द्यावापृथिवी आ विवेश ॥६॥	अहम् | द्यावापृथिवी इति | आ | विवेश ॥६॥

I (*ahám*) stretch (*ā´tanomi*) the bow (*dhánuḥ*) for Rudra (*Rudrā´ya*) for his arrow (*śárave*) to kill (*hántavái u*) the Brahman-hater (*brahma-dviṣe*). I (*ahám*) make (*kṛṇomi*) strife (*samádam*) for the people (*jánāya*). I (*ahám*) have entered (*ā viveśa*) heaven and earth (*Dyā´vā-pṛthivī´*).

पुरा त्रिपुरविजयसमये रुद्राय रुद्रस्य। षष्ठ्यर्थे चतुर्थी [२।३।६२।१]। महादेवस्य धनुः चापम् अहम् आतनोमि ज्यायातं करोमि। किमर्थम्? ब्रह्मद्विषे ब्राह्मणानां द्वेष्टारं शरवे शरुं हिंसकं त्रिपुरनिवासिनमसुरं हन्तवै

* In RV. viii. 5. 6 सुमेधाम् is fem.

हन्तुं हिंसितुम्। हन्तेः 'तुमर्थे से-सेन्' [३।४।९] इति तवै-प्रत्ययः। 'अन्तश्च तवै युगपत्' [६।१।२००] इत्याद्यन्तयोर्युगपदुदात्तत्वम्। शृ हिंसायाम् [धा° ९।१६] इत्यस्मात् 'शृस्वृस्निहि°' [उ° १।११] इत्यादिना उ-प्रत्ययः। 'क्रिया-ग्रहणं कर्तव्यम्' [१।४।३२ भा°] इति कर्मणः सम्प्रदानत्वाच्चतुर्थी। उ-शब्दः पूरकः। अहम् एव समदम्। समानं माद्यन्त्यस्मिन् (?) इति समत् संग्रामः। स्तोतृजनार्थं शत्रुभिः सह संग्राममहमेव कृणोमि करोमि। तथा द्यावापृथिवी दिवञ्च पृथिवीञ्च अन्तर्यामितया अहमेव आविवेश प्रविष्टवती ॥६॥

अथर्ववेदभाष्यम्। पुरा त्रिपुरविजयसमये रुद्राय। षष्ठ्यर्थे चतुर्थी। रुद्रस्य महादेवस्य धनुः अहम् आ ततोमि आततज्यं करोमि। किमर्थम्? ब्रह्मद्विषे ब्राह्मणानां द्वेष्ट्रे शरवे। शृ हिंसायाम् [धा° ९।१६]। 'शृस्वृस्निहि°' [उ° १।११] इत्यादिना उ-प्रत्ययः। हिंसकाय। उभयत्र 'क्रियाग्रहणं कर्त्तव्यम्' [१।४।३२ भा°] इति कर्मणः सम्प्रदानत्वाच्चतुर्थी। ब्रह्मद्विषं शरुं त्रिपुरनिवासिनम् असुरगणं हन्तवै हन्तुं हिंसितुम्। हन्तेः 'तुमर्थे सेसेन्' [३।४।९] इति तवै-प्रत्ययः। 'अन्तश्च तवै युगपत्' [६।१।२००] इत्याद्यन्तयोर्युगपदुदात्तत्वम्। उशब्दः पूरणः। अहम् एव जनाय स्तोतृजनार्थं समदम्। समानं माद्यन्त्यस्मिन् (?) इति समत् संग्रामः। तं (?) कृणोमि करोमि तथा द्यावा-पृथिवी द्यावापृथिव्यौ अहम् आ विवेश अन्तर्यामित्वेन प्रविष्टवती ॥६॥

दीपिका। या च का च बलकृतिर्मम कर्मैव तत्। का कथा पार्थकर्णादि-कीटानाम्, यो हि रुद्रः पिनाकेन त्रिभुवनं भाययति, उद्दीपितामर्षाद् यस्माद् ब्रह्मद्विषः सन्तस्यन्ति, उग्रतमस्य तस्य साधूनां परित्राणाय दुष्कृतां च विनाशाय धनुषि ज्यारोपणं मदायत्तमेव। भक्तानां चाह्वानमनुरुध्यमानया 'सपत्नक्षयण्या' मया समरेष्वपि व्याप्रियते, श्रुतिविषयगुणया च मया विश्वं व्याप्यावस्थीयते। "यो देवो अग्नौ यो अप्सु यो विश्वं भुवनमाविवेश। य ओषधीषु यो वनस्पतिषु तस्मै देवाय नमो नमः॥" [श्वेताश्व° २।१७] इति श्रुतिरपि मामेव सर्वगतत्वेन वर्णयन्ती संस्तौति। ॥६॥

रुद्राय—Dativus commodi.

रुद्राय धनुरातनोमि—In RV. Rudra is well-known for his bow and arrows (ii. 33. 10-11, v. 42. 11), he is called स्थिरधन्वन् and चिप्रेषु in इमा रुद्राय स्थिरधन्वने गिरः चिप्रेषवे देवाय स्वधावे RV. vii. 46. 1. What *Vāk* means is that even the great archer Rudra owes his skill in archery to her. Contrast: अहं वज्रं भवसे धृष्णु ददे x. 49. 2.

ब्रह्मद्विषे शरवे हन्तवै—ब्रह्मद्विषे is the obj. of हन्तवै and should have been put in the Acc. The dative infinitive "is commonly used without an object; hence a dative often appears beside it by attraction instead of an accusative." MACDONELL, *Vedic Grammar*, p. 408. *Cf.* इन्द्राय सूर्याय x. 14. 12 (p. 281), ब्रह्माण इन्द्रं मरुतो अकृण्वन्वर्धयन्नहये हन्तवा उ v. 31. 4. 'the Brahmans with their songs exalting Indra strengthened him with hymns to slay the serpent.' मयः पतिभ्यो जनये परिष्वजे AV. xiv. 1. 46 'a joy to husbands (it is) to embrace a wife.'

In x. 182. 3 तपुर्मूर्धा तपतु रक्षसो ये ब्रह्मद्विषः शरवे हन्तवा उ the Dat. in ब्रह्मद्विषे has been changed into the Nom. "May he whose head is flame burn the Brahman-hating Rākṣasas in order that his arrow may slay them"—thus translates Bloomfield who rightly regards x. 182. 3 as patterned upon x. 125. 6.

ब्रह्मद्विषे—Dative by Attraction. Regular form is ब्रह्मद्विषम्.

शरवे—Final Dative.

हन्तवै—Dative infinitive.

आविवेश—In the Vedas the Perfect is used even when there is no परोक्षत्व. Pāṇini's rule is छन्दसि लुङ्-लङ्-लिटः ३।४।६. See p. 31.

अहं जनाय समदं कृणोमि—The suggested sense is that she is also संहर्ष समदम् (ii. 12. 3) like Indra. *cf.* वागस्यैन्द्री सपत्नक्षयणी TS. i. 6. 10. 6. समद is fem. समदितिःस्त्रीलिङ्गं संग्रामनाम, समं सह माद्यन्ति योद्धारो यासु इति। Haradatta. समदो दानेः सम्मदो वा मदेः। *Nir.* ix. 17. Indra gives specific instances of his help to mortals:

अहं गृभ्णो अतिथिग्वमिष्करमिषं न इषवुरं विध्यं धारयम्।
यत् पर्णयघ्न उत वा करञ्जहे प्राहं मह्ने दधिषे भरीमभि ॥ x. 48. 8.

अहं द्यावापृथिवी आविवेश—She pervades heaven and earth. *Cf.* गीता—मयि सर्वमिदं प्रोतं सूत्रे मणिगणा इव। In Babylonian mythology, the word of Bel-Marduk is described as "a net of majesty that encompasseth heaven and earth."

7

अहं सुवे पितरमस्य मूर्ध-
न्मम योनिरप्स्वन्तः समुद्रे ।
ततो वि तिष्ठे भुवनानु विश्वो-
तामूं द्यां वर्ष्मणोप स्पृशामि ॥७॥

अहम् | सुवे | पितरम् | अस्य | मूर्धन् ।
मम | योनिः | अप्सु | अन्तरिति | समुद्रे ॥
ततः | वि | तिष्ठे | भुवना | अनु | विश्वा ।
उत | अमूम् | द्याम् | वर्ष्मणा | उप |
स्पृशामि ॥७॥

I (*ahám*) give birth to (*suve*) the father (*pitáram*) on his head (*asya mūrdhán*), my (*máma*) origin (*yóniḥ*) is within the ocean (*samudré*) in the waters (*apsú antáḥ*). Thence (*tátaḥ*) I spread through (*vitiṣṭhe*) all (*viśvā*) beings (*bhúvanā ánu*), and (*utá*) I touch (*úpaspṛśāmi*) yonder (*amū́m*) sky (*dyā́m*) with my summit (*varṣmáṇā*).

'द्योः पिता' [तै° ब्रा° ३।७।५।४-५] इति श्रुतेः पिता द्यौः । पितरम् दिवम् अहं सुवे प्रसुवे जनयामि, 'आत्मन आकाशः सम्भूतः' [तै° आ° ८।२] इति श्रुतेः । कुत्रेति तदाह—अस्य परमात्मनो मूर्धन् मूर्धन्युपरि । कारणभूते तस्मिन् हि वियदादिकार्यजातं सर्वं वर्तते, तन्तुषु पट इव । मम च योनिः कारणं समुद्रे । समुद्रवन्त्यस्माद्भूतजातानीति समुद्रः परमात्मा । तस्मिन् अप्सु व्यापनशीलासु धीवृत्तिषु अन्तः मध्ये यद्ब्रह्मचैतन्यं तन्मम कारणमित्यर्थः । यत ईदृग्भूताहमस्मि ततः हेतोः विश्वा विश्वानि सर्वाणि [भुवना] भुवनानि भूतजातानि अनुप्रविश्य वितिष्ठे विविधं व्याप्य तिष्ठामि । 'समवप्रविभ्यः स्थः' [१।३।२२] इत्यात्मनेपदम् । उत अपि च अमूं द्याम् विप्रकृष्टदेशेऽवस्थितं स्वर्गलोकम् । उपलक्षणमेतत् । एतदुपलक्षितं कृत्स्नं विकारजातं वर्ष्मणा कारणभूतेन मायात्मकेन मदीयेन देहेन उपस्पृशामि । यद्वा, अस्य भूलोकस्य मूर्धन् मूर्धन्युपरि अहं पितरम् आकाशं सुवे । समुद्रे जलधौ अप्सु उदकेषु

अन्तः मध्ये मम योनिः कारणभूतोऽम्भृणाख्य ऋषिर्वर्तते। यद्वा, समुद्रे अन्तरिक्षे अप्सु अम्मयेषु देवशरीरेषु मम कारणभूतं ब्रह्मचैतन्यं वर्तते। ततोऽहं कारणात्मिका सती सर्वाणि भुवनानि व्याप्नोमि। अन्यत् समानम् ॥७॥

अथर्ववेदभाष्यम्। अस्य दृश्यमानस्य प्रपञ्चस्य मूर्धन् मूर्धनि उपरिभागे सत्यलोके पितरं प्रपञ्चस्य जनकं विधातारम् अहं सुवे जनयामि। षूङ् प्राणिगर्भ-विमोचने [धा°२।२१]। अदादित्वाच्छपो लुक्। स्रष्टृसहितस्य जगतः कारणभूताया मम योनिः कारणं समुद्रे। समुद्रवन्त्यस्माद् भूतजातानीति समुद्रः परमात्मा। 'समुद्र एवास्य बन्धुः समुद्रो योनिः' [श° ब्रा° १०।६।४।१] इति वाजसनेयकश्रुत्या समुद्रशब्दवाच्यत्वं परमात्मनो दर्शितम्। तस्मिन् परमात्मनि अप्सु व्यापन-शीलासु धीवृत्तिषु अन्तः मध्ये यद् ब्रह्मचैतन्यं तत् मम कारणमित्यर्थः। यद्वा समुद्रे जलधौ अप्सु उदकेषु अन्तः मध्ये वाडववैद्युतरूपेण यत् तेजो वर्तते तदेव माध्यमिकवाग्रूपाया मम योनिः कारणम्। ततः तेजःकारणकत्वाद्धेतोः विश्वा विश्वानि सर्वाणि भुवनानि भूतजातानि वि चष्टे प्रकाशयामि। उत अपि च अमूं द्याम् विप्रकृष्टां दिवम्। उपलक्षणमेतत्। एतदुपलक्षितं कृत्स्नं ब्रह्मण्यध्यस्तं विकारजातं वर्ष्मणा देहेन कारणभूतमायात्मकेन उप स्पृशामि। यद्वा अस्य भूलोकस्य मूर्धन् मूर्धनि उपरि पितरम् आकाशम्। "द्यौः पिता पृथिवी माता" [तै° ब्रा° ३।७।५।४-५] इति श्रुतेः। सुवे प्रेरयामि। तथा समुद्रे अन्तरिक्षे अप्सु अव्विकारेषु देवशरीरेषु मम कारणभूतं ब्रह्म व्याप्य वर्तते इत्यर्थः। शेषं पूर्ववत् ॥७॥

दीपिका। परिदृश्यमानस्य प्रपञ्चस्याध्यक्षोऽपि मयैव परमे व्योमनि प्रसूयते। अहं पुनः सागरसलिलेषु समधिगतजन्मास्मि। समुद्रे कल्लोलकोलाहलरूपेण लब्धात्मा क्रमेण वायवीयतरङ्गसङ्गेनोर्ध्वमुद्गच्छन्ती समग्रे जगति कृतपदा सती सुदूरवर्तिनं स्वर्लोकमपि शरीराग्रेण स्पृशामि। तथाच श्रुतिः—"अनन्तामन्तादधिनिर्मितां महीम्।" [तै° ब्रा° २।८।८।४] इति ॥७॥

Bergaigne translates—"I give birth to the father even on the head" and adds in a foot-note : an enigma which seems to mean "I give birth to the heaven at the top of the heaven. Vāc represents there particularly the roar of the thunder [which practically divests the sky of the clouds under which it had become invisible]." Geldner translates: "I give birth to (or, I drive) the father on the summit of this world." Hopkins translates: "I beget the father of this (all) on the height ; my place is in the waters, the sea ; thence I extend myself among all creatures and touch heaven with my crown."

सुवे—सू would appear to have been originally used with reference to females and जन् with ref. to males. सूकर, सूनु, सुत, sow, son, swine, etc., are from the same root.

पितरम्—Geldner points out that the father is the अध्यक्ष in x. 129. 7 यो अस्याध्यक्ष: परमे व्योमन् as whose mother or guide appears वाक् in this hymn and compares SB. v. 1. 3. 11: यदि वै प्रजापते: परमस्ति—वागेव। (तस्या अव्यक्तशब्दब्रह्मत्वेन पूर्वमवस्थानादिति भाव:—S.)

मूर्धन्—The Loc. would appear to have been an indefinite case in the beginning, so we find the Loc. sing, of many stems in several I. E. languages without ending. In Skt. several *an*-stems have Loc. singular without ending as also *i*- and *u*- stems which appear in the lengthened grade in the Loc. without ending. In the Av. Gathic forms like *dam*, *dan*, 'in the house', in Greek, infinitives like *dómen* (दामन् to give), *idmen* (विद्मन्, to know) and isolated forms like *aiés* (ever, always) and in Latin the preposition *penes* ('with') are instances of Locatives without ending.

मूर्धन् is mentioned in the Uṇādi rule : वज्रचन् पूषन् प्रीहन् क्रोदन् स्नेहन् मूर्धन् मज्जन्नर्यमन् विश्वक्सन् परिष्कन् मातरिश्वन् मघवन्निति 1. 158 and is derived from मुर्वी or मुर् with कनिन् and is consequently accented on the first syllable. In Vedic literature, however, it is accented on the second syllable. Under i. 59. 2 S. merely says : मूर्तमच्छिन्

धीयत इति मूर्धा [निरुक्त ७२७]। अनुचक्रित्यादौ निपातनाद्रूपसिद्धिः। Av. *kamərəδa-* (=Skt.* कमूर्धन्, कुमूर्धन्) head (of demons, animals, etc., Old English *molda* 'head', Gk. *blōthrós* (**mlōthrós*).

मम योनिरप्स्वन्तः समुद्रे—वाक् remained in these waters as the roar of the sea, as the thunder and further as the cosmic principle in the ancient waters from which acc. to x. 121. 7 the असु of the gods, *i.e.*, the wind came out. Geldner. समुद्रे···अप्स्वन्तः occurs in x. 45. 3 also. समुद्रे अन्तः x. 177. 1. वाक् is also often identified with the ocean: वाग् वै समुद्रः Tāṇḍya B. vii. 7. 9, वाग् वै समुद्रो न वै वाक् क्षीयते, न समुद्रः क्षीयते। AB. xxiii. 1.

ततः—from there. *Cf.* ततो देवानां समवर्ततासुरेकः x. 121. 7.

वितिष्ठे—AV. reads विचष्टे.

भुवना—AV. has the later form भुवनानि. Similarly व्रता नु विश्वद व्रतपा अदाभ्यः occurs in TB., but व्रतानि in AB. *Variants*, III. 67.

वर्ष्मणा—वर्षिमन्, वर्षीयस्, वर्षिष्ठ, etc., are from the same root वृष् (इ with *s*-extension). The corresponding Greek word is *hérma* prop, support (for **wersma*, I. E. **wersmn̥*).

8

अहमेव वात इव प्र वा-	अहम् एव वातःऽइव प्र वामि।
म्यारभमाणा भुवनानि विश्वा।	आऽरभमाणा भुवनानि विश्वा॥
परो दिवा पर एना पृथि-	परः दिवा परः एना। पृथिव्या।
व्यैतावती महिना सं बभूव ॥८॥	एतावती महिना सम् बभूव ॥८॥

I myself (*ahám evá*) blow forth (*právāmi*) like the wind (*vā´taḥ iva*), grasping (*ārábhamāṇā*) all (*víśvā*) beings (*bhúvanāni*), beyond (*paráḥ*) heaven (*divā´*), beyond (*paráḥ*) this earth (*enā pr̥thivyā´*), such (*etā´vatī*) I have become (*sámbabhūva*) through my greatness (*mahinā´*).

विश्वा विश्वानि सर्वाणि भुवनानि भूतजातानि कार्याणि आरभमाणा कारणरूपेणोत्पादयन्ती अहमेव परेणानधिष्ठिता स्वयमेव प्रवामि प्रवर्ते वात इव। यथा वातः परेणाप्रेरितः सन् स्वेच्छयैव प्रवाति तद्वत्। उक्तं सर्वं निगमयति। परो दिवा। पर इति सकारान्तं परस्तादित्यर्थे वर्त्तते, यथाध इत्यधस्तादर्थे*। तद्योगे च तृतीया सर्वत्र दृश्यते। दिव आकाशस्य परस्तात्। एना पृथिव्या। 'द्वितीयाटौस्स्वेनः' [२।४।३४] इतीदम एनादेशः। अस्याः पृथिव्याः परः परस्तात्। द्यावापृथिव्योरुपादानमुपलक्षणम्। एतदुपलक्षितात्† सर्वस्माद्विकारजातात्‡ परस्ताद्वर्तमानासङ्गोदासीनकूटस्थब्रह्मचैतन्यरूपाहं महिना महिम्ना एतावती संबभूव। एतच्छब्देनोक्तं सर्वं परामृश्यते। [एतावती।] एतत् परिमाणमस्याः। 'यत्तदेतेभ्यः परिमाणे°' [५।२।३९] इति वतुप्। 'आ सर्वनाम्नः' [६।३।९१] इत्यात्वम्। सर्वजगदात्मनाहं सम्भूतास्मि। [महिना।] महच्छब्दादिमनिचि 'टेः' [६।४।१५५] इति टिलोपः। ततः तृतीयायाम्, उदात्तनिवृत्तिस्वरेण तस्या उदात्तत्वम्। छान्दसो मलोपः ॥८॥

अथर्ववेदभाष्यम्। विश्वा विश्वानि सर्वाणि भुवनानि भूतजातानि कार्याणि आरभमाणा कार्यरूपेणोत्पादयन्ती अहमेव अनन्यसहाया प्रवामि प्रवर्ते। वा गतिगन्धनयोः [धा° २।४०]। अदादित्वाच्छपो लुक्। तत्र दृष्टान्तः—वात इव। यथा वायुः परेणाप्रेरितः स्वेच्छयैव प्रवाति तद्वदित्यर्थः। उक्तं सार्वात्म्यं निगमयत्युत्तरार्धेन। परो दिवा। परः इति सकारान्तं परस्ता-

---

* The temptation is great to change अधस्तादर्थे into अधस्तादित्यर्थे but AVS. also shows अधस्तादर्थे.

† सर्वात् is a misprint for सर्वस्मात् in M. but has been copied all the same in certain printed editions.

‡ षष्ठी was expected acc. to षष्ठातसर्थप्रत्ययेन. *Cf.* सुभाषितं हारि विशत्यधो गलात् *Kādambari*. "चन्द्रगोमी [२।१।८१] त्राह—'अवधिविवक्षायामतसर्थैरपि पञ्चमी भवत्येव' इति।" कातन्त्रविस्तर folio 70*b*.

दित्यर्थे वर्तते, यथा अध इत्यधस्तादर्थे। तद्योगे च तृतीया सर्वत्र दृश्यते। दिवा आकाशस्य परस्तात् एना पृथिव्या। 'द्वितीया टौस्स्वेनः' [२।४।३४] इतीदम एनादेशः। 'सुपां सुलुक्°' [७।१।३९] इति तृतीयाया आच् आदेशः। अस्याः पृथिव्याः परः परस्तात्। द्यावापृथिव्योरुपादानम् उपलक्षणम्। एतदुपलक्षितात् सर्वस्माद् विकारजातात् परस्ताद् वर्तमाना असङ्गोदासीनकूटस्थब्रह्मचैतन्यरूपा अहं महिम्ना माहात्म्येन एतावती सं बभूव एततपरिमाणा उदीरितसकलजगदात्मना सम्भूतास्मि। एतच्छब्दाद् 'यत्तदेतेभ्यः°' [५।२।३९] इति वतुप्। 'आ सर्वनाम्नः' [६।३।९१] इत्यात्वम् ॥८॥

दीपिका। एवञ्च वायुरूपाहं वायुरिव निरावाधं निरङ्कुशं च वहमाना विश्वं समग्रं निर्मिमाणा उदग्रतमाया दिवः पृथुतमायाश्च पृथिव्याः प्रान्तान् समतिक्रान्तवती। अत एव "वाग् वै त्वष्टा" [ऐ° ब्रा° ६।४] इति श्रुतिर्मां त्वष्टेति व्यपदिशति। इत्थञ्चेदृक्त्वेयत्तया वा परिच्छेत्तुं न शक्यं मे महत्त्वम्। विस्तीर्णेयमर्णवनेमिर्वा सर्वतोविसारि गगनमण्डलं वा नैव प्रभवति मातुं मे माहात्म्यम्। यथाहि यथेच्छं सञ्चरतो वातस्य घोषा एव श्रूयन्ते, रूपं पुनर्न प्रत्यक्षीक्रियते, तथैव मम कार्यमिदं विश्वं सन्दृश्यते सर्वैः, रूपं पुनर्मे प्रायेण न प्रत्यक्षीभावमुपयाति प्राकृतजनानाम्। नैवाहं चक्षुषा ग्राह्या न च शिष्टैरपीन्द्रियैः। मनसा तु प्रयत्नेन गृह्येऽहं सूक्ष्मदर्शिभिः॥ "यस्मात् परं नापरमस्ति किञ्चिद् यस्मान्नाणीयो न ज्यायोऽस्ति कश्चित्। वृक्ष इव स्तब्धो दिवि तिष्ठत्येकस्तेनेदं पूर्णं पुरुषेण सर्वम्॥" [श्वेताश्व° ३।९] इति श्रुतिरपि मामेवोपवर्णयति। अतो मामेव शरणं गच्छ सर्वभावेन भारत। मत्प्रसादात् परां शान्तिं स्थानं गच्छसि शाश्वतम् ॥८॥

इति काश्यप-श्रीचितीशचन्द्र-शर्म-विरचिता देवीसूक्त-दीपिका समाप्ता।

वात इव—*Cf.* वायुर्न राष्ट्री vi. 4. 5. (said of Agni); अन्तरिक्षे पथिभिरीयमानो न नि विशते कतमच्चनाहः going along his paths in the air he (Vāta) rests not for a single day, x. 168. 3; आत्मा देवानां भुवनस्य गर्भो यथावशं चरति देव एषः। घोषा इदस्य शृण्विरे न रूपं तस्मै वाताय हविषा विधेम॥ x. 168. 4. "Breath

of the gods, germ of this world, this god fares according to his will. His sounds are heard, (but) his form is not (seen). To that Vāta we would pay worship with oblation" (MACDONELL)

परो दिवा, etc.—*Cf.* x. 85. 5 परो दिवा पर एना पृथिव्या परो देवेभिरसुरैर्यदस्ति. *Cf.* also *Raghu* vi. 77:

आरुद्रमद्रीनुदधीन् वितीर्णं भुजङ्गमानां वसतिं प्रविष्टम्।
ऊर्ध्वं गतं यस्य न चानुबन्धि यशः परिच्छेत्तुमियत्तयालम्॥

दिवा—AV. shows दिवः. Similarly in the case of परो देवेभिरसुरैर्यदस्ति RV. x. 82. 5, MS. ii. 10. 3 reads देवेभ्यः. "The prepositional adverbs परस्, अवस्, अर्वाक् govern either abl. or instr. without difference of meaning. This use of the abl. is apparently related to the abl. of comparison." BLOOMFIELD, *Variants* § 574. *Cf.* the instrumentals with अन्य in अन्यदेवाहुर्विद्ययान्यदाहुरविद्यया Iśā U.

परः—See M's *Vedic Grammar*, p. 423. "पर इत्येतत् सकारान्तमव्ययं वैदूर्यमाचष्टे। 'परो दिवा पर एना' इति यथा।" S. under इन्द्रं को वीर्या परः i. 80. 15.

महिना—In the older language are found several instrumental singulars of *man*-stems in which *-mnā* becomes *-mā* (*drāghmā*) or *-nā* (*mahinā*, *variṇā*, *prathinā*, etc).

एतावती महिना संबभूव—*cf.* एतावानस्य महिमा x. 90. 3. *Cf.* न त्वावाँ इन्द्र कश्चन न जातो न जनिष्यतेऽति विश्वं ववक्षिथ॥ i. 81. 5.

सम्बभूव—Veṅkaṭamādhava's remarks on the use of लङ्, लुङ् and लिट् are interesting. ननु भूतलकारेषु सप्तसु ततस्ततः। परोक्षादिविभागेऽस्मिन्निर्बन्धः केन पाणिनेः॥ विहितेषु लकारेषु भूतमात्रे ततो वयम्। तत्तदाख्यानुसारेण वक्ष्यामोऽर्थांस्तथा तथा॥ नैवं युक्तं रूपभेदादर्थभेदश्च युज्यते। पश्यामोऽपि च वाक्येषु भेदं पाणिनिदर्शितम्॥ ... स्पष्टमेव लकारार्थान् पश्यामो ब्राह्मणेषु च। हरिश्चन्द्रो ह वैधसः शौनःशेपश्चिरीक्ष्यताम्। तस्माद् यथा तथा भूते परोक्षाद्यतनादिकम्। प्रदर्शयेत् प्रयत्नेन मन्त्रे ऽपि च पण्डितः॥ स्पष्टः संवादसूक्तेषु परोक्षाद्यतनादिकम्। तथान्येषु च सूक्तेषु न तं भेदं परित्यजेत्॥ न पश्यति यदा मन्त्रे तं विशेषं प्रयत्नतः। अपि वैकाक्षरविकलं भवन्ति छान्दसास्तदा॥ A comparison of this hymn with the other आध्यात्मिक hymns of RV. reveals its great delicacy in contrast with the bravado of those hymns. Compare for instance अहं जनाय समदं कृणोमि of this hymn with अहमत्कं कवये शिश्नथं हथैरहं कुत्समावमाभिरूतिभिः।

अहं गृभस्य अधिता वधर्यमं न यो रर आर्यं नाम दस्यवे ॥ अहं पितेव वेत्सूंरभिष्टये तुग्रं कुत्साय आदिभं च रन्धयम् । अहं भुवं यजमानस्य राजनि प्र यद्धरी तुजये न प्रियाधृषे ॥ अहं रन्धयं सगयं शुतर्वणे यन्माजिहीत वसुना चनानुषक् । अहं वेशं नमसायवेऽकरमहं सव्याय पन्थामिमरन्धयम् ॥ x. 49. 3-5.

A Paurāṇic देवीसूक्त is current in some parts of Bengal. We are indebted to Prof. Satyendra Nath Sen for the following stanzas of this hymn:

कात्यायनकुलोद्भूते सर्वदेवांशसम्भवे ।
श्रीजय-श्रीजय-श्रीदे प्रसीद गिरिजे सति ॥
महासुरौघनिर्णाशे महादेव-मनोहरे ।
श्रीजय-श्रीजय-श्रीदे प्रसीद गिरिजे सति ॥
सुरथाधिष्ठिते गौरि ब्रह्मादिसुरवन्दिते ।
श्रीजय-श्रीजय-श्रीदे प्रसीद गिरिजे सति ॥
चतुर्वर्गप्रदे देवि चतुर्वर्गात्मिके शुभे ।
श्रीजय-श्रीजय-श्रीदे प्रसीद गिरिजे सति ॥
माहेश्वरि महामाये महामोहविनाशिनि ।
श्रीजय-श्रीजय-श्रीदे प्रसीद गिरिजे सति ॥
राज्यसाम्राज्यशुभदे राजराजेश्वरप्रिये ।
श्रीजय-श्रीजय-श्रीदे प्रसीद गिरिजे सति ।
सर्वशान्तिप्रदे सौम्ये जयदे भुवनत्रये ।
श्रीजय-श्रीजय-श्रीदे प्रसीद गिरिजे सति ॥
देवीसूक्तमिदं राजन् पराशर-प्रचोदितम् ।
पठन् सप्तशतीं राजन् पठित्वा फलमाप्नुयात् ॥
देवीसूक्तमविज्ञाय पठेत् सप्तशतीं यदि ।
अभिचाराय भवति फलं नाप्नोति किञ्चन ॥

इति श्रीबृहद्-ब्रह्माण्डपुराणे पृथुपराशर-संवादे देवीसूक्तं समाप्तम् ।

The prayer in the fifth chapter of the Caṇḍī beginning with नमो देव्यै महादेव्यै is also known as देवीसूक्त.

श्रीसदाशिवसमर्पणमस्तु

———